
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

Accession No: ~~7876~~ M898
Title: धर्मप्रवृत्ति
पत्र: — 99
लेखक - नारायणभट्ट

(1)

ध॰मं॰
१

श्रीगणेशाय नमः ॥ निर्विघ्नमस्तु ॥ नारायणं नमस्कृत्य कामदां च सरस्वतीं गणनाथगुरुश्चा
पि धर्मसंरक्षणाय वै ॥ १ ॥ धर्मः प्रवृत्तिः क्रियते कलौ नारायणेन तु विदुषां कर्मनिष्ठानां सं
मति धर्मवर्धनं ॥ २ ॥ आलोक्य धर्मशास्त्राणि मन्वादिभिः कृतानि वै ॥ आश्वलायनसूत्रं
च वृत्तिं नारायणो तथा ॥ ३ ॥ सारमेव समुद्धृत्य स्मृतीनां वचनान्यथा ॥ सिद्धांतानि समूला
नि समादाय यथा चैव हि ॥ ४ ॥ वचनानि ज्ञातानि चैव क्षमितानि मनीषिणां ॥ ग्रंथेस्मिन् तानि लि
ख्यंते धर्मप्रवृत्तिसंज्ञिके ॥ ५ ॥ श्रौतोचोदिकाः प्रवक्ष्यामि क्रियाश्चानुक्रमेण तु ॥ तिथीनामपि
सर्वासां निर्णयामप्यसंज्ञायातां ॥ ६ ॥ योगोन्वयः ॥ यस्मिन् देशे मृगः कृष्णः तस्मिन् धर्मान्निबो
धत ॥ धर्मसंरक्षणार्थाय तस्मिन् देशे वसेद्द्विजाः ॥ ७ ॥ उषःकाले समुत्थाय चिंतयेदात्मनो हितं
॥ स्मृत्वा नारायणं देवं स्तोत्राण्यपि च संजपेत् ॥ ॥ अथ मौनविधिः ॥ ॥ प्रभाते मैथुनं चैव प्रस्रा

राम
१

वेदंतधावने॥ स्नाने भोजनकाले च मौनं षट्सु विधीयते॥ दशहस्तं परित्यज्य मूत्रं कृत्वा जला-
श्रये॥ शतहस्तं पुरीषे पुनर्नदीतीरे चतुर्गुणं॥ ॥याज्ञवल्क्यः॥ ॥दिवासंध्यासु कर्णस्थब्रह्म-
सूत्रेः उदङ्मुखः॥ कुर्यान्मूत्रपुरीषे च रात्रौ च दक्षिणामुखः॥ ॥ब्रह्मचारीविषये इति केचित्॥
एकवस्त्रविषये इति केचित् वसिष्ठः॥ कृत्वा यज्ञोपवीतं तु पृष्ठतः कंठलंबितं॥ विण्मूत्रे तु गृ-
ही कुर्याद्यद्वा कर्णे समाहितः॥ मूत्रे तु दक्षिणे कर्णे पुरीषे वामकर्णके धारयेद्ब्रह्मसूत्रं तु मै-
थुने लघुपवीतवत्॥ अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा॥ वाचं नियम्य यत्नेन ष्ठीवनो-
च्छ्वासवर्जितः॥ कृत्वा समोपादपद्भौ मलमूत्रे समुत्सृजेत्॥ मनुः॥ संध्यां बुद्ध्वा हि जन्मनः॥
प्रत्यन्नभिमुखश्चैतान्विशंस्तत्र च नोत्सृजेत्॥ मनुः॥ अरण्ये नुदके रात्रौ चौरव्याघ्रकुले
पथि कृत्वा मूत्रपुरीषे च द्रव्यहस्तो न दुष्यति॥ काष्ठादीनाप्यपानस्यमभेध्यंनिर्मजोद्विवे

कंदमूलफलांगारैर्नोमेध्यं निर्मार्जीत वै ॥ मूत्रं कृत्वा विना शौचं कृच्छ्रं बध्वाद्विजाधमः ॥ कृच्छ्रान्वितं
मूत्रयुक्तः समृद्धो नरकं व्रजेत् ॥ इति मुत्रपुरीषोत्सर्जनं ॥ ॥ अथ शौचं ॥ ॥ चतुर्णामपि भू
तानां प्राणिनो नीव चोत्तमः ॥ प्राणिभ्योपि मतिश्रेष्टाः सर्वे बुध्युपजीविनः ॥ मतिमद्भ्यो नराः श्रे
ष्टास्तेभ्यः श्रेष्टानुवाडवाः ॥ विप्रेभ्योपि मतिश्रेष्टाः सर्वे बुध्युपचविद्वांसोद्विद्वन्द्यः कृतनिश्च
यः ॥ तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा ॥ रत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृते ॥
स्मृत्यर्थसारे ॥ शौचं तु द्विविधं प्रोक्तं बाह्यमभ्यंतरं तथा ॥ मृज्जलाभ्यां ॥ स्मृतं बाह्यं
भावशुद्धिस्तथांतरं ॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धतैः जलैः ॥ गंधलोपक्षयकरं शौचं
कुर्यादतंद्रितः ॥ स्मृतिः ॥ मृद्धुम्रवर्णा विप्रस्य क्षत्रस्य रक्तमृत्तिका ॥ वैश्यस्य पीतवर्णा तु शूद्र
स्य कृष्णमृत्तिका ॥ स्मृत्यर्थसारे ॥ अंतर्गेहे देवगेहे वल्मीके मूषकस्थले ॥ कृतशौचाव

त्रोण्याश्च न ग्राह्याः पंचमृत्तिकाः ॥ मलमूत्रसमीपस्था वृक्षमूलस्थिता च या ॥ वापीकूपतडागेषु
न ग्राह्याः पंचमृत्तिकाः ॥ मार्गे खरश्मशाने स्याः पांसुला मलिनास्त्यजेत् ॥ काटीगारास्थिरहिता मा
हुरेखं करान्विताः ॥ अंतर्जलगता ग्राह्या दूरतो मलिवंधनात् ॥ अरण्यके षु त्वेवं स्याद्ग्रामेषा
ह्वरणं विदुः ॥ स्मृतिः ॥ आहरेन्मृत्तिकां विप्रः कूलात्सरितकूलयोः ॥ शुद्धदेशे तु संवीक्ष्य ग्राह्या केश
भस्मविवर्जिता ॥ अभावे मृद युक्ता या युस्मिन्देशे तु या भवेत् ॥ तथा शौचं प्रकुर्वीत द्विजो मृ
त्तिकया पि वा ॥ अर्द्धप्रसृतमात्रं तु प्रथमा मृत्तिका स्मृता ॥ द्वितीया तु तृतीया तु तदर्द्धार्द्धाः प्र
कीर्त्तिताः ॥ त्रिपर्वपूरमात्रा वा मृत्तिका क्षप्रमालिकां ॥ आर्द्रामलकमात्रा वा मूत्र शौचे तु मृ
त्तिका ॥ एका लिंगे करे तिस्र उभयोर्मृद्द्वयं स्मृतं ॥ पंचापाने दश्रैकस्मिन्नुभयोः सप्तमृत्तिकाः
एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः ॥ वानप्रस्थस्य त्रिगुणं यतीनां चा चतुर्गुणं ॥ य द्वि

3

ध॰मं॰
३

वाविहितं शौचं नद्दृष्टं निशि कीर्तितं ॥ नद्दृष्टमातुरे शौचं मातुरस्यापि मध्यमं ॥ स्त्रीशूद्रोरग्रा
कानां बालानां चोपनीतिनां ॥ गंधलेपक्षयकरं शौचं प्रोक्तं महर्षिभिः ॥ शौचे यत्नः सदा कार्यो
शौचमूलो द्विजः स्मृतः ॥ शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः ॥ मूत्रे तु द्विगुणं शुक्रे मैथुने
त्रिगुणं स्मृतं ॥ पश्चात्तु शोधयेत्तीरं नान्यथा शुचितामियात् ॥ पादपृष्ठे पादं न लेपितिस्मृतिस्स
श्वमृत्तिका ॥ एकैकया मृदा पादौ हस्तौ प्रक्षालयेत्ततः ॥ वामं प्रक्षालयेत्पादं शूद्रादेवकथं च
ना ॥ शौचात्तु ते वामपादं पश्चाद्दक्षिणमेव च ॥ यतिश्चैव द्विसंख्येस्तावामुत्रं वाथ मलं यदि ॥ आ
जंघं क्षालयेन्मूत्रे द्विगुणं च स्मात् कटिमले इति शौचविधिः ॥ अथ गंडूषं ॥ चतुरष्टद्विषट् द्व्यष्टं गंडू
षैः शुध्यते क्रमात् ॥ मूत्रे पुरीषे भुक्त्यन्नरेतः प्रस्रवणेपि च ॥ पुरतः सर्वदेवाश्च दक्षिणे पितरस्त
था ऋषयः पृष्ठतः सर्वे वामे गंडूषमुत्सृजेत् ॥ प्राङ्मुखो थोदङ्मुखो वा द्विराचम्य ततः परं ॥ उक्त

राम
३

कालेन कुर्वीत वाग्यतो दंतधावनं ॥ स्मृतिः ॥ मुखे पर्युषिते यस्माद्भवेद् अशुचिभाङ् नरः ॥ ततः कुर्या
त्प्रयत्नेन शुद्ध्यर्थं दंतधावनं ॥ खदिरश्च करंजश्च कदंबश्च वटस्तथा ॥ तिंतिणी वेणुवृक्षाश्च
त्वाम्रनिंबौ तथैव च ॥ अपामार्गश्च बिल्वश्च त्वर्कश्चोदुंबरस्तथा ॥ एते प्रशस्ताः काष्ठेन दंत
धावनकर्मसु ॥ समिधाक्षीरवृक्षस्य प्रमाणं द्वादशांगुलं ॥ कनिष्ठिकाग्रवत्स्थूलं पूर्वार्द्धं नत्रि
रूक्षितं ॥ अथ निषिद्धवृक्षाः ॥ स्मृतिसारसमुच्चये ॥ गुवाकतालहिंतालकेतकी च महावटः
खर्जूरनारिकेलाश्च सप्तैते तृणराजकाः ॥ तृणराजसमीपे तो यः कुर्याद्दंतधावनं ॥ नरः श्वा
डालयोनिः स्याद्यावद्गंगां न पश्यति ॥ अथ वर्ज्यतिथयः ॥ स्मृतिसारसमुच्चये ॥ अभ्यंगे चो
दधिस्नाने मैथुने दंतधावने ॥ जाते च निधनं चैव तिथिस्ता कालिकी स्मृता ॥ प्रतिपत्पर्वषष्ठी
षु नवमी द्वादशी तथा ॥ दंतानां काष्ठसंयोगे प्रयत्नेन विवर्जयेत् ॥ स्मृतिः ॥ अर्कवारे व्यतीपा

(5)

तेसंक्रांत्याजन्मवासरे॥ वर्जयेद्दंतकाष्टं तु नंदादिषु च पर्वसु॥ तृणपर्णैः सदामाएकादश्रींविना॥
तयोरपि च कर्तव्यं जंबुनिबांम्रपल्लवैः॥ स्मृतिः एकादश्यां तृणैः पर्णैः कर्तव्यं दंतधावनं॥ स्ना
त्वादेवार्चनं कुर्याद्दंतसंकल्पमाचरेत्॥ उदित्ते चहस्तांशेष कुर्याद्दंतधावनं॥ सवित्ताभस्ति
तस्तेन पितृवंशस्य घातकः॥ स्मृत्यंतरे॥ अंगारं वालुकाभिश्च भस्मांगारनखैरपि॥ इष्टिका
लोष्टपाषाणैन कुर्याद्दंतधावनं॥ अभावे दंतकाष्टानां निषिद्धायां तथा च पि॥ अपां द्वादशगं
डूषैर्मुखशुद्धं भविष्यति॥ ॥इति दंतधावनविधिः॥ अथ स्नानविधिः॥ विष्णुः॥ उत्तमं तु नदीस्ना
नं तडागे मध्यमं स्मृतं॥ कूपे श्नानं तु सामान्यं भांड स्नानं तथा न वेत्॥ नदीषु देवखातेषु प्र
तश्नायाद्दिने दिने॥ नद्यां वे तडागे वा कूपे वा श्नानमाचरेत्॥ विष्णुः॥ जले निमज्जब ध्यायाद्वि
त्वामाचम्य चैयतः॥ पुनराचम्य संकल्पानद्यां श्नानं समाचरेत्॥ समाहास्नानरस्नायोद्वि

जः शूद्रत्वमाप्नुयात्॥ तस्मात्॥ स्नानं प्रकर्तव्यं सूर्योदये सदैव हि॥ मनुः॥ अत्यंतमलिनः
कायो नवच्छिद्रसमन्वितः॥ स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनं॥ नदीं गंतुमशक्तश्चेद्गृ
हे वा स्नानमाचरेत्॥ स्वयं चैवाथ शिष्यैश्च पुत्रैर्वौध्यन वारिणा॥ पाराशरः॥ न स्नायाद्धु
द्धहस्तेन नैकहस्तेन वा तथा॥ संधत्तान्द्विरभिस्नायाद्दान्तताभिर्हि जोतिभिः॥ स्मृत्यर्थसारे
जानमात्रे जलेतिष्ठन् आचमन्क्विनदुष्यति॥ उपविश्य समाचामेज्जानुमात्रादधो ज्जलाद्धि
राचम्य पुनिमज्ज्याथ पुनरेव द्विराचमेत्॥ मंत्रेणैव शिखां बध्वा प्राणानायम्य वै ततः॥ मनुः॥ क
राभ्यां धारयेद्भौनं शिखावद्धं विधाय च॥ प्राणायामं ततः कुर्यात्सकल्पं च समुच्चरेत्॥ वि
श्वामित्रः॥ नाभिमात्रे जलेतिष्ठन् सप्तद्वादश पंच वा॥ त्रिवापि चालुप्त स्नानमेवं विधीयते
स्नात्वा चदेहं प्रक्षाल्य पुनः स्नात्वा द्विराचमेत्॥ आपो हिष्ठादिनवभिर्वारुणैर्मार्जयेत्तथा सां

गुह्यपञ्चसूत्रेण त्रिःप्रदक्षिणमाचरेत्॥ याःप्रवन्त इति जले त्विमंमेगंगइति ऋग्वा॥ स्मृतिः॥ स्नं क
स्यसूक्तपठनेमार्जनं वाघमर्षणं॥ दितर्पणं चैवयं वांगं स्नानमाचरेत्॥ वसिष्ठः॥ स्त्रोतसोभि
मुखंस्नायामार्जनं वाघमर्षणं॥ अन्यत्रार्कमुखेण त्रौ प्राङ्मुखोऽग्निमुखोऽपि वा॥ स्त्रोतसो
भिमुखो मज्जेद्यत्रापःप्रभवेति च॥ स्थावरेषु चसर्वेषु त्वादित्याभिमुखस्तथा॥ याः
समुद्रगा नद्यस्तासु स्नानं तु संमुखं॥ सर्वेषां शाखिनामेव विना वाजसनेयिनः॥ प्रयो
गपारिजातसारवल्यां॥ गोमयस्नानं॥ आचम्य॥ गोमयं वामे हस्ते धृत्वा विभज्य चात्रे
धा तत्प्रणवेनैव संप्रोक्षेद्भूर्भुवस्वरों॥ सर्वेदिक्षु क्षिपेत् किंचि गोमयप्रणवेन तु॥ मानस्तो
के इति मंत्रेण मुक्त्वा तदभिमंत्रयेत्॥ गंधद्वारामरणमेनां गंमस्तकाद्यनुलेपयेत्॥ उदुत्त
मं मुमुग्धो ति हिरण्यशृंगमिसथा॥ प्रसंम्राजे वरुहस्तृक्तमवेत हेलमिष्टचो॥ याःप्रवत

द्रूसेकाजलमध्येपठेत्क्रमात्॥ सुमित्र्यानाघद्रूत्वेवमयोयाम्येक्षिपेद्बहिः॥ नमोनारायणायेतिचतु
रस्त्रंप्रकल्पयेत्॥ तीर्थंपुष्करसंज्ञंतुतत्रसंनिहितोहरिः॥ इदंविष्णुरनेनैवमंत्रेणादित्यमोक्षये
त्॥ सव्याहृतिकांगायत्रीजसवास्नानमाचरेत्॥ द्विराचम्यजलेनैवधृत्वाचैवोर्ध्वपुंड्रकं॥ अं
तश्चरतीसाचम्यसमुद्रादूर्मिरित्यथा आपोअस्मानृगायत्र्यात्रिरसात्यभिषेचयेत्॥ तत
स्नात्वाद्विराचम्यत्र्यंबयोयंनिवेजपेत्॥ आपोहिष्ठेमंमेगंगेसत्वन्नोअग्नइत्यृचाव्याहृती
भिस्त्वमंत्रांतेकुशोर्मार्जनमाचरेत्॥ आपोहिष्ठादिभिर्मंत्रैर्जलेत्वलमालोडयमंत्रतः॥ ऋतंच
त्यादिभिर्मंत्रैरघमर्षणकंचरेत्॥ हंसःशुचिषदित्येकांपूतंपवित्रिणेतिचा॥ सव्याहृतिकांगाय
त्रीत्रिर्जप्त्वानिमज्जयेत्॥ अथाचम्यततोविद्वान्मार्भिः केशवादिभिः॥ द्वादशभिर्निमज्जाथ
हृतंचेतिचवैजपेत्॥ हंसःशुचिषदित्येकांत्रिर्जप्त्वमूर्ध्निसिंचयेत्॥ त्वन्नोअग्नेतनश्चैवसत्वं

न्नोअग्नइत्यथ॥तरत्समंदीसूक्तं चजपंस्नात्वासमाचरेत्॥अकारादिहकारांतं अक्षरैः सर्वादिनाःप
ठेत्॥विप्रःश्चानुक्रमेणैवंस्नानकालेतुसर्वदा॥अग्नाअग्नइहावसेअधिवासंयेदाभवेत्॥अयं
यज्ञोदेवयाअग्नेभवसुषमिधा॥अतीयामेविदा॥अग्नेरक्षाणेअहंसः॥स्तिरग्ने॥अग्निद्दुत्तंपुरो
दधोअग्नेबाधस्व॥अघामुरीया॥अध्वर्योद्रावयात्वं॥तद्दिक्षेः॥युल्किंविदं॥स्वरत्नौचरणेतश्चैव
जपेदेतारूचस्वतः॥त्रिरालुपपदिहिएक्षम्यगायत्र्यास्नानमाचरेत्श्रोतेनवः॥हस्ताभ्यांजलमा
दायसकृदेवाभिमंत्रितं॥मस्तकेचमुखेवाव्होहृदयेष्टशादेश्एके॥अभिषिंचेत्स्वमात्मानंगपत्र्या
योनिमुदया॥एकाग्रत्याजपेच्छत्याचेत्तुर्वीवत्वंतनुः॥स्मृ. स्क. क्त. विधिनास्नानंद्विएचम्यततः
परं॥प्राणायामत्रयंकृत्वासंकल्प्यंतर्पयेदपः॥अक्षतोदकपुष्पेनदेवतिर्थेनतत्रतु॥ब्रह्मादि
तर्पणंकुर्यात्॥अनुरवश्चोर्ध्वश्चोपवित्सयतेपुनः॥उदकानुखोनिवीतितुवयसंमिश्रितोदकैः॥कृत्न

द्वैपायनो दिशश्च न पश्येत्तर्पयेत्पितृतीर्थेन ततः॥ दक्षिणाभिमुखो भूत्वा प्राचीनावीत्यतः परं॥ तर्पयेत्पितृतीर्थेन
तिलैः सोमपितॄन् तथा॥ यन्मया दुष्कृतं तोयं शरीरमलसंभवं॥ तत्पापस्य विशुद्ध्यर्थं यक्ष्माणं तर्पयाम्यह
असंस्काराश्च ये केचिज्जलाशाः पितरो मम॥ तेषामाप्यायनार्थाय दीयते सलिलं मया॥ हस्ताभ्यां वि
क्षिपेत्तोयं पतिरे सलिलाद्बहिः॥ तीर्थपीडयेद्वस्त्रं मंत्रतो दक्षिणेन ततः॥ ये केचास्मत्कुले जाता अपुत्रा
गोत्रिणो मृताः॥ ते गृह्णंतु मया दत्तं वस्त्रनिष्पीडनोदकं॥ दर्भान्विसृज्य तत्तीरे ह्युपवीती द्विराचमे
त्॥ अक्लिन्नवस्त्रं संप्रोक्ष्य शुचिर्वोढव्यमंत्रतः॥ परिधाय सुवस्त्रं तु युवं वस्त्राणि मंत्रतः॥ स्नात्वा दे
वान्नमस्येत्॥ शिरोंगानथवा द्विजः॥ यो गात्र स्नातकाय नमः जीवत्यंबरेण करेण वा॥ स्नानलेले
नसाम्यं च पुनः स्नानेन शुध्यति॥ तिलकोट्यार्धकोटि च यावद्रोमाणि मानुषे॥ वसंति सर्वतीर्थानि
तस्मान्न परिमार्जयेत्॥ पिबंति शिरसो देवाः पिबंति पितरो मुखात्॥ मध्याच्च यक्षगंधर्वा अधश्चा

सर्वे जंतवः॥ सुरापानसमं तोयं स्पृष्टं तु केशबिंदवः॥ दक्षिणे जान्हवीतोये वामे तु रुधिरं भवेत्॥ वसि
ष्ठः॥ स्नानं कृत्वाधृते वस्त्रे पतंति केशबिंदवः॥ न स्नानं निष्फलं विंद्यात्पुनः स्नानेन शुध्यति॥ अथ
वस्त्रविधिःकृत्यः॥ श्रुतिस्मृतिप्रमोदे नग्नात्यं वस्त्रं च धारयेत्॥ पद्मे तिरनोग्नात्याः वस्त्रं तु न तु धा
रयेत्॥ वसिष्ठः॥ अपवित्रपटो नग्नो नग्नश्चार्द्धपटः स्मृतः॥ नग्नश्च मलिनोद्वासो नग्नः कौपीन
वानपि॥ काषायवाससा नग्नो नग्नो नैनर्यवानपि॥ अंतःकच्छो बहिःकच्छो मुक्तकच्छस्तथैव चा
साक्षान्नग्नः स विज्ञेयो दशनग्नाः प्रकीर्तिताः॥ द्व्यंगुलं चतुरंगुलं वोत्तरीयपटं निमित्तं॥ काषायं कृ
ष्णवस्त्रं च मलिनं केशदूषितं॥ छिन्नाग्रं चोपवस्त्रं च कुत्सितं धर्मतो विदुः॥ हारितः॥ नग्नका
षायं वासःस्यान्नग्नः कौपीनकेवलः॥ नग्नः संधित्तवासश्च नग्नोर्द्धदशवस्त्रकः॥ याज्ञवल्क्यः॥
दग्धं जीर्णं च मलिनं मूषकोपहतं तथा॥ खादितं गोमहिष्याद्यैस्तत्याज्यं सर्वथा द्विजैः॥ निलिर

कं तु परवस्त्रं दूरतः परिवर्जयेत् ॥ स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति ॥ पालनाद्धि क्रियंतो ह्य
न्तर्द्धिनैरुष जीवनात् ॥ अपवित्रो भवेद्धि प्रोक्षितैर्भिक्षुकैः विशुध्यति ॥ नीलरक्तं यदा वस्त्रं विप्रस्यांगे
षु धारयेत् ॥ नेतु संततिसंख्याको वसेद्यमपुरे ध्रुवं ॥ कंबले पट्टसूत्रे च नीलिदोषो न विद्यते ॥ स्त्रि
या वस्त्रं सदा साज्य अन्यवस्त्रं विवर्जयेत् ॥ अधूतं कारधूतं च पूर्वेद्युर्धुतमेव च ॥ त्रयमेतदसंवं
धं सर्वकर्मसु वर्जयेत् ॥ इषधुता स्त्रिया धूतं शूद्रधूतं तथैव च ॥ अधुतं तच्च विज्ञेयं शुष्कं दक्षि
णपल्लवैः ॥ अप्सु नौ पीडयेद्वस्त्रं यथा हि द्विजसत्तमः ॥ खट्वायाः पृष्ठमुपरि तं तु वस्त्रं नैव च धारये
त् ॥ धूतं च तु गुणं कृत्वा भूमाववग्नेन पीडयेत् ॥ वामकोष्टे तु निक्षिप्य दक्षिणे च प्रविशुध्यति प्राग
ग्रमुदग्ग्रं वा धौतवस्त्रं प्रसादयेत् ॥ प्राग्दक्षिणयोः कृत्वा पुनः शौचं विधीयते ॥ एकवस्त्रो न भुं
जीयान्न कुर्याद्देवतार्चनं ॥ न कुर्यात्सितकर्माणि दानहोमजपादिकं ॥ खंडवस्त्रावृतश्चैव व

ध॰मं॰

८

स्त्रार्द्रमावृतस्तथा॥वचनंतस्यनग्नाख्यंश्वान्नोच्छिष्टहविर्यथा॥चंद्रिकायां॥स्नानंदानंजपोहोमंस्वा
ध्यायपितृकर्मच॥नैकवस्त्रोद्विजःकुर्याच्छ्राद्धभोजनसंक्रियां॥वसिष्ठः॥अष्टहस्तंनवश्वेतंसद
शंनान्यधारितं॥अहतंतद्विजानीयात्सर्वकर्मसुपावनं॥दक्षिणोत्तरयोःकट्योकच्छंबध्नातिवैद्वि
जे॥नाभौचवामकुक्षौचपृष्ठेचैवयथाक्रमं॥अथार्द्रवस्त्रनिष्पीडनं॥स्नानंकृत्वार्द्रवस्त्रंतुसजे
न्धावमधोद्विजः॥गृहेतुस्नानकंकृत्वाविसृजेदेनदुर्ध्वतः॥स्नानंकृत्वाचार्द्रवस्त्रमुत्तरीयंकमूर्ध्व
तः॥धृतवस्त्रमधःकुर्यादाचम्यंचपुनर्द्वयं॥नोत्तरीयंमधःकुर्यान्नोपर्यधस्थमंबरं॥अहानार्द्र
द्विकुर्वितपुनेनशुध्यती॥धृत्वावस्त्रंविधानेनकरेवामेनिधायतत्॥आर्द्रवस्त्रंद्विराचम्यानिष्पी
डयपुनराचमेत्॥तथाचस्मृतिः॥निष्पीडयवस्त्रमाचम्यततःसंध्यामुपासते॥मध्याह्नेतर्पणादू
र्ध्वंवस्त्रनिष्पीडनंभवेत्॥नद्यादिश्नानेतोगृहेश्नानवस्त्रंसदाद्विजः॥स्वयमेवचनिष्पीडयस्त्रि

राम

८

याहस्तेन दोषभाक्॥ द्वादश्यां पंचदश्यां च संक्रांतौ श्राद्धवासरे वस्त्रं निष्पीडयेन्नैव न क्षालेन च यो
जयेत्॥ अथ सप्तश्नानि॥ याज्ञवल्क्यः॥ मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च॥ वारुणं मानसं चै
व सप्त स्नानान्यनुक्रमात्॥ प्रातश्नानाद्यशक्तविषयमाह॥ दक्षः॥ प्रातश्नाने त्वशक्तश्चेन्मार्जयेद्रा
र्द्रवाससा॥ उक्तं मंगानिपादांतं संभवे स्नानकृद्द्विजः॥ प्रातःकाले त्वशक्तश्चेत् संक्षिप्य स्नानमाच
रेत्॥ स्नानं चैव तु मध्याह्ने द्विजः कुर्यात्सविस्तरं॥ अथ गृहस्नानं॥ गृहे गृहामुखं विद्यादन्यत्रा
भिमुखे रवेः॥ प्रवाहाभिमुखं कुर्यात्स्नानमेव द्विजोत्तमः॥ आपः स्वभावतो मेध्याः किं पुनर्वह्नि संयुत
अतः संतस्तु शंसंति श्नानमुष्णेन वारिणा॥ शीतास्वप्सु निषिच्योष्णाः शीतास्त्वासु निषिंचयेत्॥
नाभिस्नानं गृहे प्रोक्तं न कुर्याच्छीतवारिणा॥ संक्रांतौ गृहले चैव त्वमावास्यार्कपर्वसु॥ गृहे वापि प्र
कुर्वीत स्नानं सानोदके न च॥ संकल्पसूक्तपठनं मार्जनं चाघमर्षणं॥ देवादितर्पणं चैव गृहे पंच

विवर्जयेत्॥ इति गृहस्नानं॥ अभ्यंगे चैव मांगल्ये गृहे चैव तु सर्वदा॥ सोष्णोदकेन स्नायोन धार्यं गात्रि
चंदनं॥ गृहे स्नानेन कुर्वीत तर्पणं मार्जनं तथा॥ जंगत्रा चमनं कुर्यात् पश्चादाचम्य शुध्यति॥ पा
दौ प्रक्षाल्य पाणी च समाचम्य गृहे द्विजः॥ स्नात्वा शिखां च बध्नीयाद्दिराचम्य विशुध्यति॥ गृहे
स्नानं यदा कृत्वा स्नान वस्त्रोर्ध्वकं सजेत्॥ अधोगेन च संपीड्य पारा शर वचो यथा॥ स्नानं
कृत्वार्द्र वस्त्रं च मूर्ध्वमुत्तारयो द्विजः॥ आर्द्र वस्त्रमधस्ताच्चेत् पुनः स्नानेन शुध्यति॥ अथ
सचैलस्नानं॥ स्नानं कुर्यात् समाजोर मद्य भांडं रजस्वला॥ मातापित्र विस्पृष्टा नां क्रियामुत्सृज्य
पावकाः॥ स्पृष्ट्वा देवलकं चैव सचैलं स्नानमाचरेत्॥ देवार्चन परो विप्रो वित्तार्थी वत्सर त्रयं
स वै देवलको नाम महव्यकव्येषु वर्जयेत्॥ चितिं च चितिकाष्ठं च यूप चांडालमेव च॥ स्पृष्ट्वा
देवलकं पूर्वाह्णः॥ अथान्यत्खनितकूपस्नानं॥ अंत्यजैः खानिताः कूपास्तडागादिस्तथैव

वे॥ तेषु स्नात्वा च पीत्वा च पंचगव्येन शुध्यति॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैवान्त्यजातयः॥ ए
भिः स्पृष्टानि ताः कूपास्नानं तत्र न कारयेत्॥ पंचपिंड्यां नुद्धृत्य न स्नायात्सरवारिषु॥ स्नायां
नद्यां देवखाते च ह्रदेषु च सरःसु च॥ अथ नदी रजोदोषः॥ सिंहकर्कटयोर्मध्ये सर्वा नद्यो रज
स्वलाः॥ तासु स्नानं न कुर्वित वर्जयित्वा समुद्रगाः॥ योगो॥ रजोदुष्टेषु न स्नानं वर्जेन द्यादिषु द्विजैः
कदर्थितं रजस्तासां संध्योपास्तिं च तर्पणं॥ गंगो च यमुना चैव प्लक्षजा च सरस्वती॥ रजसा ना
भिभूयंते ये चान्येन दसंज्ञकाः॥ अत्र विशेषमाह व्याघ्रपादः॥ उपाकर्मणि चोत्सर्गे प्रेतस्नान
तथैव च॥ चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते॥ अभावे कूपवापीनां मनपायमन्त्रं व्रजेत्॥
रजोदुष्टेपि पयसां ग्रामभोगान विद्यते॥ अस्थिचर्मादियुक्तं च खरश्वानादिदूषितं॥ उद्धरेदु
दकं सर्वं शोधनं परमार्जनं॥ धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते॥ न ता नदी शब्दवाच्याग

18

ध० सिं०
१०

णोस्ताः परिकीर्तिताः॥ गर्त्तानां सर्वदा चैव रजोदोषो न विद्यते त्र अश्मानं प्र कुर्वित भार्गवस्य वचो यथा॥
अथ कुशविधिः॥ स्मृत्यर्थसारे॥ कुशाः काशा यवा दूर्वोशीराः श्च सकुंदकाः॥ नलदा व्रीहयो मु
ञ्जा दश दर्भाः प्रकीर्तिताः॥ नभोमासस्य दर्शे तु शुचिर्दर्भान्समाहरेत्॥ अयातयामास्ते दर्भा नि
योज्याः स्युः पुनः पुनः॥ विष्णुः॥ नभोमास चतुर्दश्यां दर्भास्तत्र समाहरेत्॥ अयातयामा॰ पूर्ववत्
कृष्णपक्षे चतुर्दश्यां मासी नीतव्याः कुशाद्विजैः॥ अकालिकास्तथा शुद्धा अतद्धर्मे विगर्हितः॥ स्ना
त्वा शुचौ दर्भदेशे शुचिर्भूत्वा समाहितः॥ दिग्देवतानां मंत्रेण चतुर्दिक्षु क्षिपेत्कुशान्॥ विरि
ञ्चिना सहोत्पन्न परमेष्ठिनिसर्गज॥ नुद पापानि सर्वाणि मम स्वस्तिकरो भव॥ हुं फट्कारेण
मंत्रेण सकृच्छित्त्वा समुद्धरेत्॥ अच्छिन्नाग्रा वशुष्काग्राः पित्र्ये तु हरिताः कुशाः॥ अंगोरः॥ अहन्य
हनि कर्मार्थं कुशोत्पाटः प्रशस्यते॥ न पूर्वेद्युर्धृत कुशा योग्याः श्वैवान्यरे कुशाः॥ मासिमास्वध

राम
१०

न कुशमासि मास्येव चोदिता॥ नोत्तरोत्तरमासेषु धर्मैर्बर्हिरसंयुताः॥ प्राङ्मुखासंभृतान्दर्भान्न
र्जयेच्छ्राद्धकर्मणि॥ सद्यः समाहृताः शस्ताः कुशास्तु श्राद्धकर्मणि॥ कुशाभावे तु काशास्युः काशाः
कुशामयाः स्मृताः॥ काशाभावे गृहीतव्या अन्ये दर्भा यथोचिताः॥ पितृकृत्येषु सर्वेषु कुशग्राह्याः
समाहिताः॥ दूर्वाश्लक्ष्णाः सदा ग्राह्याः सर्वेषु शुभकर्मसु॥ तथा च॥ सूत्रे॥ अप्रच्छिन्नाग्रावणं
तद्दर्भौ प्रादेशमात्रौ कुशौ नानन्तर्योरिति॥ यथा च कारिकायां॥ अनंतस्तरुणौ तु कुशौ प्रादेश
संमितौ॥ अनखच्छेदनौ साग्रौ तौ पवित्राभिधायकौ॥ अथ निषिद्धानाह ग्रंथः॥ ये त्वंतर्गर्भिता
दर्भा येच्छिन्नाननखैस्तथा॥ क्वथिता नग्निदग्धाश्च कुशान्यत्नेन वर्जयेत्॥ चितौ तोयेषु ये द
र्भा ये दर्भा यज्ञभूमिषु॥ स्तरणासनदर्भेषु षड्दर्भास्तु विवर्जयेत्॥ स्मृत्यर्थसारे॥ येः कृतपि
ण्डनिर्वापः श्राद्धं वा पितृतर्पणं॥ विण्मूत्रादिषु ये दर्भास्तेषां त्यागो विधीयते॥ प्रचेताः॥ अमायां

तुनचच्छिद्यात्कुशांश्चसमिधास्तथा॥सर्वथा वस्थितेसोमेहिंसयावंह्यहाभवेत्॥तथाचसोमो
मतौ॥वनस्पतिगतेसोमेयस्तुहिंस्याद्वनस्पतीः॥घोरायांभ्रूणहत्यायांयुज्यतेनात्रसंशयः॥
अयंनिषेधस्स्वार्थच्छेदने॥कर्मांगत्वच्छेदनेनैवदोषः॥तथाचजाबालिरप्याह॥कुशांच्छाकंचपुष्पा
णिगवार्थेचतृणादिकं॥निषिद्धोपिचगृह्णीयाद्यमावास्याहनिद्विजः॥मनुः॥ततश्श्राद्धदिनं
कर्तादिशंगच्छेत्तुदक्षिणां॥दक्षिणप्रवणांदर्भान्समूलान्हरेत्शुचिः॥पराशरः॥समित्पुष्पकुशा
दीनिश्रोत्रियस्स्वमाहरेत्॥शूद्रानीतैःक्रयक्रीतैःकर्मकुर्वन्व्रजत्यधः॥अथपवित्रलक्षणं॥स्म
त्यर्थसारे॥चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकं॥एकैकंन्यूनमुद्दिष्टवर्णेयथाक्रमं॥
सर्वेषांवाभवेद्द्वाभ्यांपवित्रंग्रंथितंनवा॥त्रिभिस्त्रिभिस्तुशांतिकेकार्येपौष्टिकेपंचभिस्तथा॥चतु
र्भिश्चाभिचारेस्यान्निःकामैरितिकेचन॥द्वौदर्भौदक्षिणेहस्तेसव्येत्रीनासनेसकृत्॥हमाद्रौवि

शेषतु तुः॥ पंचभिः पौष्टिके चैव चतुर्भिर्यज्ञकर्मणि॥ पितृयज्ञे त्रिभिर्दर्भैर्द्वौ दर्भौ नित्यकर्मणि॥ श्राद्धे
ग्रास्वाखरपः सा ग्रग्राकुशास्युः षोडशांगुलाः॥ द्विमूलमेकतः कुर्यात्पवित्रं चाग्रमेकतः॥ द्व्यंगुलं मूलव
लयं ग्रंथिरेकांगुलं तथा॥ चातुरंगुलमग्रं स्यात्पवित्रस्य प्रमाणकं॥ स्नाने दाने जपे यज्ञे स्वा
ध्याये नित्यकर्मणि॥ सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा॥ उभयत्र स्थितैर्दर्भैः समाचामति
यो द्विजः॥ सोमपानफलं तस्य भुक्त्वा यज्ञफलं भवेत्॥ ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेत्॥
आचमेद्यस्तु होमात्मा यथोच्छिष्टं तथैव सः॥ ब्रह्मयज्ञ जपे होमे ब्रह्मग्रंथिर्विधीयते॥ भोजने वर्तुलं
प्रोक्तं मेषधर्मो विधीयते॥ सपवित्रः सदर्भो वा कर्मांगाचमनं चरेत्॥ नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छि
ष्टं तु वर्जयेत्॥ यथा वज्रं सुरेंद्रस्य शूलं हस्ते हरस्य च॥ चक्रायुधं यथा विष्णोरेवं विप्रकरे कुशः
अथ सुवर्णादिपवित्राणि॥ दार्भ्यं पवित्रतां मन्त्रं वाराजितं हेममेव च॥ विभूषा दक्षिणे पाणौ पवित्रं चो

(12)

ध०सिं०
१२

तरोत्तरं॥याज्ञवल्क्यः॥अनामिकायां धृतेहेमतर्जन्यां रौप्यमेव च॥कनिष्ठिकायां धृतंखड्गं तेन पूतो भवेन्नरः॥तर्जन्यां विन्नयाद्रौप्यं स्वर्णं चोपकनिष्ठया॥ग्रहस्या कर्णयोश्चैव सुभैरोक्तं च कुंडले॥कुत्तरीयं योगपट्टं तर्जन्यां रौप्यमेव च॥कनियसापवित्रां च न धार्यमिति कौ॥शौनकः॥पादुके चोत्तरीयं च तर्जन्यां रौप्यधारणं॥न धारयेत्स्वपिता चैव ज्येष्ठभ्राता रजीवति॥ताने च भ्रातरी ज्येष्ठे यस्य चैव तु जीवति॥नस्यतमौनं तर्जन्यां रजतस्य च धारणं॥पादुकारोपणं चैव योगपट्टस्तथैव च॥न जीवत्पितृकः कुर्यात्क्रियाश्राद्धं तथैव च॥अथ यज्ञोपवीतं॥भृगुः॥उपवीतं द्वितीरेकं द्वितथेनरयोः स्मृतो॥एकमेव यतीनां स्यादिति धर्मो व्यवस्थितः॥मनुः॥यज्ञोपवीते द्वे धार्ये श्रौतेस्मार्तेच कर्मणि॥तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते॥पाराशरः॥स्तनादि नाभि पर्यंतं ब्रह्मसूत्र पवित्रकं॥न्यूने रोग प्रशतिस्यादधिके धर्मनाशनं॥आयुःकामः सदा कुर्याद्बहुयज्ञोपवीतकं॥पंचभिः पुत्रकामः स्याद्धर्मका

राम
१२

मस्तथैव च ॥ पाराशरः ॥ दण्डश्चैवाग्निहस्तस्य चत्वारि वनवासिनः ॥ एकैकमुपवीतं च यतिनो ब्रह्मचा
रिणः ॥ यज्ञोपवीतेनैकेन जपहोमादिकं कृतं ॥ तत्सर्वं विलयं याति पितॄणां नोपतिष्ठति ॥ पतितं त्रुटि
तं वापि ब्रह्मसूत्रं यदा भवेत् ॥ नूतनं धारयेद्विप्रः स्नानसंकल्पपूर्वकं ॥ यज्ञोपवीतमेकैकं प्रतिमंत्रेण
धारयेत् ॥ नष्टे भ्रष्टे आचम्य प्रतिसंकल्प्य धारयेन्मनुरब्रवीत् ॥ एकमंत्रैकसंकल्प्य धृत्वा यज्ञोप
वीतकं ॥ एकस्मिन्त्रुटिते नात्र संशयः ॥ यज्ञोपवीतमजिनं मौजिदंडं न धारयेत् ॥ नष्टे भ्रष्टे नवं धृत्वा
नष्टं चैव जले क्षिपेत् ॥ सदोपवीतिवद्धार्यं वासः सकलकर्मसु ॥ सह यज्ञोपवीतेन त्रधोया च्छादकर्म
णि ॥ मनुः ॥ कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ॥ शणसूत्रमयं राज्ञो वैश्यस्य स्यात्त्वावि
सूत्रकं ॥ स्कंदे ॥ उपवीतं क्रमेण स्यात्कार्पासक्षौममाविकं ॥ त्रिवृद्वृदूर्ध्ववृत्तं तच्च भवेद्धायुविवृद्ध
ये ॥ उच्छिष्टं तोरणं छिन्नं विक्रीतं विधवाहृतं मुक्त्वान्तरे त्वनध्याये स्वस्तु तुम धारयेत् ॥ विधवाचरि

(13)

त्रंसूत्रंमनध्यायेकृतंचरेत्॥ त्रिच्छिन्नमप्यधोयातंमुक्तोनिर्मितमुत्सृजेत्॥ संगृह्य॥ ऊर्ध्ववृत्तंपुनरू
र्ध्ववृतंय॥ एतद्यज्ञोपवितंस्यात्तस्यैकोग्रंथिरिष्यते तैत्तिरीयमैत्राकठाः काण्वाश्वरकावाजसेनका
कंठादुत्तीरस्यसूत्रंतुकुर्युर्वैक्षालनंद्विजाः॥ अथनित्यविधिः॥ वह्वृचाःसामगाश्चैवयेधान्येयजुषास्त
था॥ कंठादुत्तीर्यसूत्रंतुपुनःसंस्कारमर्हति॥ अभ्यंगेचोदधिस्नानेमातापित्रोर्मृतेहनिकंठादुत्ति
र्यसूत्रंतुकुर्याद्वैक्षालनंद्विजः॥ अथतिलक॥ ललाटेतिलकंकुर्यान्मृदावापिचभस्मना॥ नदभा
वेनतोयेनचंदनेनापिवाद्विजः॥ स्मृतिसारसमुच्चये॥ ऊर्ध्वपुंड्रंद्विजातीनामाग्नेहोत्रसमोविधिः॥
श्राद्धकालेतुपित्रादेकर्त्तीभोक्ताचसंत्यजेत्॥ ऊर्ध्वपुंड्रंमृदःसौम्यंललाटेयस्यदृश्यते॥ सचां
डालोपिदुष्टात्मापूज्यएवनसंशयः॥ ब्रह्मघ्नोवाथगोघ्नोवाहेतुकःसर्वपापकृत्॥ गोपीचंदनसं
पर्कान्मुक्तोभवतितत्क्षणात्॥ दशांगुलप्रमाणंस्यादुत्तमोत्तमउच्यते॥ नवांगुलंमध्यमंस्यादश

गुलमतःपरं॥सत्सषट्पंचभिःपुंड्रं मध्यमं त्रिविधं स्मृतं॥चतुस्त्र्यंगुलंपुंड्रं कनिष्ठं त्रिविधं स्मृतं॥ऊर्ध्वपुंड्रं मृदा कुर्यात्त्रिपुंड्रं चतुभस्मना चंदनेनोभयं कुर्यादन्यथा नरकं व्रजेत्॥मध्यांगुलित्रयेणैव ध्याये देद्ध्वपुंड्रकं॥भुवमारभ्य पल्लेन ब्राह्मणः सर्वकर्मसु॥भागवतानां मंगुलिनियमः अंगुष्ठः पुष्टिदः प्रोक्तो यशस्यामध्यमा भवेत्॥अनामिकाभिष्टियं दद्यान्मुक्तिं दद्यात्प्रदेशिनी॥दर्भपाणिनं कुर्वीत भुमध्यादिप्रदीपवत्॥श्रीकामः पुष्टिकामो वा यथेष्टं तिलकं चरेत्॥स्नात्वा पुंड्रं मृदा कुर्याद्धामं कृत्वा तु भस्मना॥अभ्यंगोत्सवे कालेनु कस्तूरी चंदनादिना॥जपो होमस्तथा दानं स्वाध्यायं पितृतर्पणं॥व्यर्थं भवति तत्सर्वं ऊर्ध्वपुंड्रं विना कृतं ललाटे तिलकं धृत्वा कुर्यात्पुंड्रं वाश्व वैष्णवाः॥तर्पणं चापि वै श्राद्धं मन्यथा निःफलं भवेत्॥भागवतविषयमेतत्॥स्मार्ते विषये तु विशेषः॥स्वाध्याय जप होमादि संध्या स्नानादिकं च यत्॥ऊर्ध्वपुंड्रं विना कुर्यात्तत्सर्वं निःफलं भवत्

(१४)

ऊर्ध्वपुंड्रं त्रिपुंड्रं वा ब्राह्मणैः कर्मकर्तृभिः॥ वर्जयेत्तिलकं भाले श्राद्धे चैव तु तर्पणे॥ अभ्यंगे सूतके चै
व विवाहे पुत्रजन्मनि॥ मांगल्येषु च सर्वेषु न धार्यं गोपिचंदनं॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा चंद्रकारमथा
पि वा॥ श्राद्धकर्त्ता न कुर्वीत यावच्छ्राद्धविसर्जनं॥ ऊर्ध्वपुंड्रं मृदा कुर्यात्स्नाने स्मार्ते च कर्मणि कृती
वाप्यथवा भोक्ता न कुर्याच्छ्राद्धकर्मणि॥ ज्ञालकः धृत्वा यस्तर्पणं श्राद्धं मृदं वा भस्म चंदनं॥ व्य
र्थं स्यात्तत्कृतं मोहात्स च गच्छत्यधोगति॥ नैव तीर्थे मृदा कुर्यादूर्ध्वपुंड्रं च भस्मना॥ चंदनेनो भ
यं कुर्यादिति मनुरब्रवीत्॥ त्रिपुंड्रं स्मृतं विप्राणां वर्तुलं नृपवैश्ययोः॥ अर्द्धचंद्रं तु शूद्राणां म
न्येषां तूर्ध्वपुंड्रकं॥ अथ भस्मधारणं॥ ब्राह्मणानां नृपाणां च भस्म मिश्रं तु चंदने॥ नेत्रयु
ग्मप्रमाणं तु त्रिपुंड्रं धारयेद्द्विजः॥ आरलावस्यां॥ मध्यमानामिकांगुष्ठैः ललाटे य त्रिपुंड्रकं न
त्रिपुंड्रं भवेद्वस्त्वं महापातकनाशनं॥ स्मृतिसारे अशुचिर्वाप्यनाचारो मनसा पापमाचरेत्

रेचनं कुर्याद्वामेनापूरितोदरः॥ कुंभकेन जपं कुर्यात्प्राणायामः स उच्यते॥ पंचांगुलिभिर्नासाग्रपी
डनं प्रणवाभिधा॥ मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थयोः कनिष्ठानामिकांगुष्ठैर्नासाग्रस्य
चपीडनं॥ ॐकारमुद्रा सा प्रोक्ता यातेश्च ब्रह्मचारिणः॥ यात्युक्त्वा॥ गायत्रीं शिरसा सार्द्धं
जपेत् व्याहृतिपूर्वकं त्रिःपठेदायतः प्राणः प्राणायामः स उच्यते॥ दशप्रणवसंयुक्ता गायत्रीं सि
रसा मह॥ त्रिःपठेदायतः प्राणः प्राणायामः स उच्यते॥ आदावंते च गायत्र्याः प्राणायामस्त्रयः स्मृ
तः॥ अथ मार्जनं॥ शौनककारिकायां॥ अथ संध्यामुपासिष्यन्नेनिसंकल्प्य मार्जयेत्॥ त्रिस्त्रभि
र्मार्जनं कुर्यादापोहिष्ठा कुशोदकैः॥ पादे पादे क्षिपेन्मूर्ध्नि प्रतिप्रणवसंयुतं॥ आत्मानं प्रणवेनैव
प्रतिषिच्य जलैः सह॥ कुर्यात्सप्रणवैः पादैर्मार्जनं तु कुशोदकैः॥ यस्य क्षयायेति जलं सकृत्राप
क्षिपेदधः॥ सव्यहस्तेन वामेन नटेन घादिकेन वा॥ गृहे तु मार्जयं न्कुर्यान्नान्यथेसन्नवा न्म

नुःकुर्यात्वाच्चरित्यात्राप्तिःसंध्याकालेगृहेद्विजः॥मार्जनेप्राशनेचार्घ्येतथैवाचमनेसदा॥सूर्यश्चे
त्यनुवाकेनप्रातःकालेपिवेदयः॥अग्निश्चेत्यनुवाकेनसायंकालेपिवेदयः॥आपःपुनंतुम
ध्याह्नेमंत्राचमनमाचरेत्॥विसृज्यदर्भानाचम्यकुशप्राणोश्चमार्जयेत्॥प्रणवेनचव्या
हृत्यागायत्र्याचैवमार्जयेत्॥आपोहिष्ठेतिनवभिर्ऋग्भिर्मार्जनमाचरेत्॥ससथत्रयमाश्र
शेवरवत्रयमस्तके॥नतत्रयपातालेआपोहिष्ठेतिलक्षणं॥त्द्तंचेकामतंवापिद्विपदा
वाजपेदृचं॥दृष्टिनासापुटेनैवपापात्मानमपोहरेत्॥तज्जलेनावलोक्याथवामभागे
क्षितौक्षिपेत्॥आचम्यदर्भान्विसृज्यधृत्वादर्भानतुत्सरं॥अथार्घ्यदानं॥गच्छदेवितुभि
घ्रत्वंगायत्रित्राह्मरूपिणे॥इदमर्घ्यंमयादत्तंपुष्टदैसवधंकुरु॥पाणिभ्यांजलमादाय
गायत्र्याचाभिमंत्रितं॥खेरभिमुखस्तिष्ठन्स्त्रोरुर्ध्वसंध्ययोः॥क्षिपेत्॥तथाचापस्तंबः॥

रुषनम्र प्रभाते प्रपूर्मध्यान्हे त्वृजुसंस्थितः॥ उपविश्य तु सायान्हे जले त्वर्घ्यं निक्षिपेत्॥ इत्या प
स्तंवविषयं॥ कालातिक्रमणे यस्तु त्रिसंध्यामपि सर्वदा॥ चतुरर्घ्यं प्रदातव्यं गायत्र्या शिरसा स
ह॥ तर्जन्यंगुष्ठसंयोगे राक्षसी मुद्रिका भवेत्॥ यो ददाति तया चार्घ्यं तत्तोयं रुधिरं भवेत्॥ आ
सावादि समंत्रेण सोदके नैव पाणिना॥ प्रदक्षिणामनुव्रज्य त्वाचमेत् संध्ययोर्द्वयोः॥ मंदेहाना
विनाशाय निक्षिपेत् जलांजलिं॥ प्रायश्चित्तार्थमाचम्य मुच्यते दैः सहस्रथा॥ अथासन
विधिः॥ वंशासने दरिद्रस्यात् पाषाणे व्याधिसंभवः धरण्यां दुःखसंभूति दौर्भाग्यं दारुकास
ने॥ तृणासने यशोहानिः पल्लवे चित्तविभ्रमः॥ कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि॥
अभिचारे च नीलस्यात्ं बलो व्याधिकर्मसु॥ क्षेन वस्त्रे यशोवृद्धिः सर्वार्थो चित्रकंबले॥ सायणि
ये॥ भिन्नासनं योगशांनं थैव मृगचर्म च॥ कृष्णाजिनं च पलेन वर्जयेत् सुत्रवान् सदा॥ आधार

रिनमस्कुर्यात्कुशाग्रैरासनं ततः॥ प्राणायामत्रयं कुर्यादुपविश्य कुशासने॥ ऋष्यादिलक्षणं न्या
सारुद्रप्रोक्तेन मार्गतः॥ न्यासं कुर्याद्विधानोक्तं षडंगं वाथ शक्तितः॥ आगच्छ देवि शीघ्र त्वं गाय
त्रिब्रह्मस्वरूपिणी॥ जपानुष्ठानसिद्ध्यर्थं प्रविश्य हृदयं मम॥ शौनकः॥ गायत्रीं संस्मरेद्धीमान् हृ
दि वा सूर्यमंडले॥ कात्यायनोक्तलक्षणेनैव ध्यात्वाभ्यर्च्य ततो जपेत्॥ प्रातस्तिष्ठं जपेद्देवीं सायं चैवो
पविश्य च॥ उपविश्य तु मध्याह्ने जपकर्म समारभेत्॥ कार्ष्णाजिनिः॥ पूर्वसंध्यां जपेत्तिष्ठं जपसा
वित्रीकर्मदर्शनात्॥ पश्चिमां तु समासीनः सम्यग्नक्षत्रदर्शनात्॥ व्यासः॥ प्रातर्मध्याह्नयोस्तिष्ठ
न् गायत्रीजपमाचरेत्॥ ऊर्ध्वजानुस्तु सायाह्ने ध्यानालोके न तत्परः॥ कारिका॥ अर्द्धास्तमि
त आदित्ये पश्चिमस्यां परान्तरः॥ भार्गवस्तन्मुख आसीनः सावित्रीं वाग्यतो जपेत्॥ अनारब्धोद
याद्देवं प्रातःकर्म न दिप्यते॥ अर्द्धास्तमितनक्षत्रं मंतरिक्षं यदा तदा॥ आरभ्य प्रागनुस्वास्ति ष्ठे

जपन्नासूर्यदर्शनात्॥ संध्यायाः सायमत्यन्तो विहितेयाविबुधैः सदा॥ प्रथमतउपनयनकाले
सायंसंध्यामुपाक्रमेदित्यर्थः॥ तथा च शौनकः॥ उपनीतो हि कुर्वीत सायंसंध्यामुपक्रमा
दिति तथा च कारिका॥ अहःशेषं तत्त्स्लिष्टे सायंसंध्यामुपासते॥ अथ जपविधिः॥ प्रातर्ना
भौ करं कृत्वा मध्याह्ने हृदि संस्थितं॥ सायं जपति नासाग्रे जपस्तु त्रिविधः स्मृतः॥ अंगुष्ठा
नामिकामूले प्रदक्षिणमतंद्रितः मध्यमामूलपर्यन्तं गायत्रीं जपद्वरितः॥ गायत्री वेदमूलत्वा
त्वेदः पर्वसु गीयते॥ पर्वभिस्तु जपेद्देवीं नमालाभिः कदाचन॥ उत्क्षेपितं चुकोनम्यो मु
क्तकेशि गत्वा च नतः॥ अपवित्रकरश्चैव प्रलयल जपेत्क्वचित्॥ ॐकारपूर्वमुच्चार्य भूर्
भुवस्वन तः परं॥ गायत्र्याः प्रणवश्चान्ते जप एव विधिः स्मृतः॥ तिस्रो व्याहृतयः कुर्वंश्प
णोकारसंयुताः॥ पुनः सत्वस्य चौंकारं मंत्रस्याद्यंतयोस्तनः॥ वाचिकाख्य उपांशुश्च मा

धं०मं०
१९

नसास्ति विधिः स्मृतः ॥ त्रयाणां जपयज्ञानां श्रेष्ठः स्यादुत्तरोत्तरः ॥ यदुच्चनीचस्वरितैः शब्दस्पष्ट
पदाक्षरैः ॥ मंत्रमुच्चारयेद्वाच्या जपयज्ञस्तु वाचिकः ॥ शनैरुच्चारयेन्मंत्रमंदमोष्ठौ प्रचाल
येत् ॥ अपरैरश्रुतः किंचित्स उपांशुजपस्मृतः ॥ विधायदक्षरश्रेण्या वर्णाद्वर्णपदात्पदं
शब्दार्थचिंतनं भूयः कथ्यते मानसो जपः ॥ मानसः सिद्धिकामानां पुत्रकाम उपांशुकः ॥ वा
चिको मारणे चैव प्रशस्ता जपरीतयः ॥ वाचिकस्त्वेक एव स्यादुपांशुः शतउच्यते ॥ सह
स्रो मानसः प्रोक्तो मन्वत्रिभृगुनारदैः ॥ स्मृत्यर्थसारे ॥ ब्रह्मचारी गृहस्थश्च नमष्टोत्त
रं जपेत् ॥ वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत् ॥ शौनकः ॥ अष्टोत्तरशतं नित्यं
मष्टाविंशतिमेव वा ॥ विधानाद्दशकं वापि त्रिकाले संजपेद्द्विजः ॥ अथ प्रदोषे जपसंख्या
श्राद्धे प्रदोषे वेदशेषे च गायत्र्योदशसंख्यया ॥ अष्टाविंशसनाध्याये सुदिने तु यथाक्रमं

रम
१९

अथ जपस्थानं॥ गृहे जपः समं विद्याद्गोष्ठे शतगुणं भवेत्॥ पुण्यारण्ये तथारामे सहस्रगुणितं
विदुः॥ अयुतं पर्वते पुण्ये नद्यां लक्षमुदाहृतं॥ कोटिर्देवालये प्राहुरनंतं विष्णुसंनिधौ॥
सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्य च जलस्य च॥ विप्राणां च गवां चैव संनिधौ शस्यते जपः॥ अश्व
त्थमूलमाश्रित्य जपहोमसुरार्चनं॥ अक्षय्यफलमाप्नोति ब्रह्मणो वचनं यथा॥ अथ निषेधः
पतितानां चांत्यजानां दर्शने भाषणे श्रुते॥ क्षुतेऽधोवातगमने जृंभणे जपमुत्सृजेत्॥ प्राप्ता
वाचम्य चैतेषां प्राणायामषडंगकं॥ कृत्वा सम्यग्जपेच्छेषं यद्वा सूर्यादिदर्शनं॥ अथ कामपर
त्वान्मालाविधिः॥ शंखाक्षमणयः श्रीदाः स्फटिका मोक्षदाः पराः॥ पद्माक्षाः पुष्टिलक्ष्मीदा
रुद्राक्षा भुक्तिमुक्तिदाः॥ पुत्रजीवभवाः पुत्राः पशुधान्यसमृद्धिदाः॥ विद्रुमा वश्यधनदाः सौभा
ग्यार्थिश्च मुक्तिदाः॥ पापक्षयाः कुशमयाः कामदाः स्वर्णरौप्यजाः प्रवालमुक्तास्फटिकै जे

18

पकोटिफलप्रदं॥ तुलसीमणिना येन गणितं चाक्षयं भवेत्॥ रुद्राक्षमणिना चैव त्वनंतफलम
श्नुते॥ अथ रुद्राक्षधारणं॥ रुद्राक्षं कंठदेशे दशनपरिमितान्मस्तके द्विंशतिर्द्वे षट् ष
ट्कर्णप्रदेशे करयुगलगता द्वादश द्वादशैवा॥ बाह्वोरिंदोः कलाभिः पृथगपि च गता चैकमे
कं शिखायां च वक्षस्यष्टाधिकं यः कलयति च शतं सः स्वयं नीलकंठः॥ अथ संध्योपासनं॥
शौनकः॥ सायं प्रातरुपस्थानं कुर्यान्मंत्रैर्यथाक्रमं॥ जातवेदस इत्येकां तच्छंयोरावृ
णीमहे॥ नमो ब्रह्मण इत्येते रुपतिष्ठेद्दिवस्पतिं॥ उत्तमे चानुवाकेन गायत्रिं च विसर्जये
त्प्रसंगतो मध्याह्ने संध्योच्यते॥ आचार्यः॥ कुर्यान्मध्याह्निकीं संध्यां ब्रह्मयज्ञादनंतरं॥
संगवादूर्ध्वमेवाह्ने चेदर्वाग्यापि वा॥ विश्वामित्रः॥ सकृदर्घ्यं तु मध्याह्ने प्रक्षिपेद्द
सदृष्टचः॥ आकृष्णेनेति मंत्रेण गायत्र्या वेति केचन॥ उपस्थानं तु मध्याह्ने कुर्यात्सू

स्यसंमुखे॥ उद्रु सेमिति वैचित्रं देवानाभिस्पने प्राच॥ अथाभिवादनं॥ आत्मपादौ नृथा भूमिं स्प
स्वामध्याभिवादनं॥ नक्षत्रं च तथा सूर्यं द्विजानाथ्याभिवादयेत्॥ विरवादर्सैं पूर्वनाम्नाभिवा
द्यापित्त वदि ह भवेत्तानदः श्रोत्रियस्त त्र्यब्दाज्यापत्कनोया न पिभवति न दामातुलोवापितृ
व्या॥ जुहन्न्व होपिव न्येकुशासलिलसमित्सुष्पपाणिस्वयं वाभ्युधो धावन्नुदस्वायवितन्द्रा
द्रक्तन घ्रान्मुणम्योपवासः॥ स्म॰ स्यर्थसारे॥ ज्येष्ठं वा यक निष्ठं वासंध्यांनेधाभिवादयेत्॥
वजयेत्तु सुतं शिष्यं दौहित्रं दुहितुः पति॥ नारायणः॥ नमेद्वेदमधोतारं पदक्रमसमन्वितं
सारपंप ब्राह्मणं सांगं कनिष्ठं चाभिवादयेत्॥ नित्यं वेदधोतारमध्यापयंतमेव च॥ अन
धोतोनमस्कुर्याज्येष्ठो वापि कनियकं॥ वाजेनाह॥ वमनं जृंभमाणं च कुर्वंतं दंतधावनं अ
भ्यक्तिं त्रिरस्नानं कुर्वंतं नाभिवादयेत्॥ दूरस्थं जलमध्यस्थं धावंतं धनगर्वितं॥ उन्मत्तं

19

धर्म॰
२१

वधिरं मूकं अंधं चैनाभिवादयेत्॥ अथोपासनविधिः॥ तत्र देशसूत्रं॥ पाणिग्रहणादिगृह्यं परिच
रेदिति॥ तत्रादौ होमकर्त्तृनाह॥ होमे मुख्यो यजमानः पत्नी पुत्रश्च कन्यका॥ ऋत्विक् शिष्यो
गुरुर्भ्राता भागिनेयः सुतापतिः॥ एतैरेव हुतं यत्तु तद्धुतं स्वयमेव हि॥ कार्यानुरोधतः कर्त्ता स्व
यं कर्त्तुं न शक्यते॥ होमं कुर्यादनाशे च ऋत्विक् तु अनुज्ञया॥ यदि स्यात् स्वकं कर्त्तुं कुर्वी
तानुज्ञया विना॥ अस्तमिते सायं जुहोत्युदिते प्रातरिति ब्राह्मणं॥ तथा च कारिका॥ अथ
यस्मिन्विवाहाग्निरुत्पन्नो दिनं तस्य तु॥ यत्सायंतनमारभ्य वह्निं परिचरेत् स्वयमित्यौपा
सनसायमारंभणमिति सिद्धं॥ आह्निकाचारे तु प्रातरारभ्य विधिर्लिख्यते॥ उदिते प्रातर्जु
होतीति श्रुतिः॥ तथा च मनुः॥ कालमाह लेखामात्रश्च दृश्येत रश्मिभिश्च समन्वितः॥ उ
दितं तं विजानीयात्तत्र होमो विधीयते॥ संग्रहे॥ हस्तादूर्ध्वं रविर्यावद्गिरिं हित्वा न गच्छति ताव

राम
२१

देवहिकालोयंप्रातस्तदिनहोमिनां॥प्रातर्द्वादशनाड्यास्तुसायंतुनावनाडिका॥होमंकालःस
मुदिष्टोमुनिभिस्तत्वदर्शिभिः॥अथस्थंडिलादि॥हस्तमात्रावरंसर्वत्रस्थंडिलंगुपलिप्येतीस्तृतं
शौनकोपि॥अरत्निमात्रंविहितेयंमग्नेरायतनंशुभं॥श्रौतेचोपासनेवापिखातयोनिविवर्जितं॥
मेखलाद्विनोयंकार्येरेखालग्नंतुबाह्यतः॥बाह्याद्व्यंगुलविस्ताराभ्यंतराच्चतुरंगुला॥बाह्या
षडंगुलोत्सेधाभ्यंतराद्द्वादशांगुला॥विस्तारेणतुकर्तव्यासमाश्लक्ष्णाद्दढाशुभा॥अन्यःपक्षः
नित्यहोमेतुकुंडस्यान्मेखलात्रयसंयुतं॥भूमेरूर्ध्वंप्रकुर्वीतचतुर्विंशांगुलंशुभं॥रेखलाचो
न्नताकार्यात्वेकैकाचतुरंगुला॥व्यंगुलाविस्तरेणैकैकाखातस्याद्वादशांगुला॥गुल्याग्निर
क्षणाशक्तविषये॥शाकलः॥अग्निसंरक्षणेयस्यशक्तिर्यदिनविद्यते॥सामिध्यारोपयेदग्निं
हस्तयोरथवापिच॥अथप्रयोगः॥लौकिकाग्निंप्रतिष्ठाप्यकुंडेवास्थंडिलेपिवा॥पालिस्थंवा

ध॰सिं॰
२२

समित्स्थं वा वन्हिं संयोजयेत्ततः॥ अथ प्रत्यवरोहेत्तिमंत्रेणाग्निसमित्स्थितं॥ पाणिस्थं वाप्यनेनैव निदध्या
ल्लौकिकेनले॥ यथाविधि सुसंकल्प्य कुर्याद्ध्यानं हविर्भुजः॥ पर्यूह्याग्निं परिस्तीर्य पर्युक्ष्य च त
तःपरं॥ पयःप्रभृतिषु त्वेकं संस्कुर्याद्दग्निहोत्रवत्॥ दर्भेण सर्वं ज्वलयेदपक्वं पक्वमेव वा॥ अ
धिश्रिते श्रपणाय प्रतिषेचेद्वारिणा पुनस्त्रोज्वलतानेन परिहृत्य प्रहृत्यवत्॥ पयो यवागूः
स्सर्पिश्च स्थोदनं दधि तंडुलाः॥ सोमस्तैलमपो ब्राह्मि ह्यादशैते तिलायवाः॥ पयय आदिनि चत्वा
रि विदुः पक्कानि याज्ञिकाः॥ दध्यान्हि नाम पक्कानां नाधिश्रपणमिष्यते॥ स्मृ॰ सर्षसारेप्रि
यंगु व्रीहिश्यामाकानीवाराश्च तथा यवाः॥ यावनालाश्च गोधूमा॥ औपासनश्रुभावहा॥
रेणा लो श्यामाकनिवारगोधूमा व्रीहयो यवः॥ स्वरूपेणैव हेमास्युः स्वरूपेणैव वैतिलाः॥
कारिका॥ व्रीहिणां च यवानां च चतुष्षष्टिरथाहुतिः॥ तिलानां तु तदर्द्धं स्यात्तदर्द्धं स्यात्स्रु त

सम
२२

स्यतु॥ द्व्यं हविस्स्रुवेणैव पाणिना कठिनं हविः॥ जुहुयादग्नये स्वाहा सुसमिद्धं हुताशने॥ श्यामाकल
अद्भिः प्रक्षालितान् शुभ्रान् तंदुलानग्निसंस्कृतान्॥ जुहुयादग्नये स्वाहा सुसमिद्धे हुताश भो श्या
कलः॥ अद्भिः प्रक्षालितान् शुभ्रान् तंदुलानग्निसंस्कृतान्॥ जुहुयादग्नये स्वाहा सूर्योपप्रातरेवच
ध्यात्वा त्वाद्वं चतुर्थ्यंतु नंप्रजापतर इत्यथा॥ स्वाहेकारेणवै हुत्वा कुर्यात्परिसमूहनं॥ औपास
नेहुनेदवमंगलिनां च वामनतः॥ वैश्वदेवेनतथा चान्ये ह्याहुतिरग्नतौहुनेत्॥ पयसाज्येन वा प्रा
तस्तेनैवेत्याहुरग्निहुतं॥ पूर्वमंत्रस्तु सूर्याय स्वाहेत्युन्न त्समं भवेत्॥ शौनकः॥ अग्नये वैश्वे
वसूयै श्वप्राजापत्यैनानिसप्तभिः॥ सौरं वैश्वानरीये वोसमस्येसतिपंचभिः॥ सायमुपस्थान
अग्नआयूंषितिसृभिः ह्याभ्यामग्ने त्वमोत्यथा॥ कुर्यात्सायमुपस्थानं प्रजापत्त इति त्वथा॥ सू
र्योनोइतिपंचैर्वचप्रातरौपासनं जपेत्॥ उदुत्यं चित्रं देवानामुद्धयं च प्रजापते॥ अथ समस्तहे

मे॥ कालद्वयेप्यशक्तश्चेदेकस्मिन्काल एव वा॥ प्रागेवोक्तेन विधिना समस्य सायमाचरेत्॥ व्रत
स्थश्चाहुतिर्हुत्वा तत्र द्वे सायमाहुती॥ द्वे प्रातराहुती सायं होमे चैकाः समिध्यन्ति॥ समस्यैं सा
यमारभ्य जुहुयात्सायमाहुती॥ परिषिंच्याहुतिं प्राहहुत्वा न परिषेचयेत्॥ द्विः सायं हो
मवन्मन्त्याद्द्विप्रातर्होमवत्स्वचरुपस्थानं सकृत्कार्यं शेषं प्रकृतिवद्भवेत्॥ हविष्यान्नं द्वि
दैवत्यमिति सूर्याग्निदैवतं॥ समस्येपं चभिः श्रीभिः प्राजापत्यहूति त्वथ॥ कुर्यादग्नेरुपस्
स्थानं सर्वत्रौंचमरूस्य॥ अभिवाद्य जपेद्वै वा यथाशक्त्यथ वादश॥ भस्माभिधारणं
कुर्याद्गृहस्थो मेस्य चैव तु॥ ललाटे हृदये बाह्वोर्भस्तके च यथाक्रमं॥ होमकालेपि कुर्वीत
त्रिपुंड्रं भस्मधारणं॥ मानस्तोकेति मंत्रेण केचिदाहुर्मनीषिणः॥ प्रतपदरणोंतन्त्रपाणिवा
यगपत्त्नयेत्॥ अयंते योत्तेयोनिःसामेधंयाते अग्नाकरणबुभौ॥ नथावश्मैनस्तुत्रे॥ अयंतेयोनि

रित्यरण्योंगार्हपत्ये प्रतपेत्स्यात्लिंवा यते याते अग्ने यज्ञियेनेति॥ तथा च स्मृतिः॥ अश्वत्थं समिधं
त्वाथिन्नामो समिधमेव च॥ तदभावे थवा चान्या समिधः प्रतपेद्बुधः॥ पालाशः खदिरोऽश्वत्थ॥ शम्युदु
बरजामितन॥ अपामार्गोऽर्क दुर्वोऽश्व कुशाश्चेत्यपरे विदुः॥ सत्वचा समिधः कार्या ऋजुश्लक्ष्णाः
समास्तथा॥ शस्ता दशांगुलास्तास्य ह्या दश्यांगुलकास्तु वा॥ षण्मासं वाशमो ग्ना त्याखादिरं तु
त्रिमासकं॥ मासत्रयं तु पालाशात्स्य खस्थो हरहः स्मन॥ दिनमेकमपामार्गो ग्ना त्याश्वार्कस
थैव तु॥ औपासने भुभाग्रो ग्का स्त्रिदिनं स्यादुदुंबरः॥ एतेषामप्यभावे तु कुशदूर्वेत्यपरे विदुः॥
मासमेकं कुशो ग्ना त्यो दुर्वास्यात्सर्व एव तु॥ स घः शमि च पालाशं सस्याह मिति केचन॥ वटाद
यो पि ग्ना त्यास्युः केचिद्यत्तविदो विदुः॥ अकाले हुतं॥ प्रयोगपारिजाते॥ अकाले यत्कृतं कर्म का
लं प्राप्य पुनः क्रिया॥ कालातीतं तु यत्कुर्याद्हुतं तं न हि चक्षते॥ यत्कर्म क्रियते माहाद काले क

नविघ्नदि॥कालेऽग्नौसपुनःकुर्यात्कृतंचापिहिकर्मनत॥संध्योपासनादिकर्मसिद्ध्यर्थं॥अथवैश्व
देवं॥तत्रेदंगृह्यसूत्रं॥अथसायंप्रातःसिद्धस्यहविष्यस्यजुहुयादग्निहोत्रदेवताभ्यइति
स्मृत्यर्थसारे॥गृहस्थोवैश्वदेवाख्यंकर्मप्रारभ्यात्तेदिवा॥अन्नस्यचात्मनश्चैवसंस्कारा
र्थमितिष्यते॥कोद्रवंवरकंमाषंमसूरंचकुलत्थकं॥कांजयकंपराण्णंचवैश्वदेवनुवर्जये
त्॥कारिकायांगृहस्थोवैश्वदेवाख्यंकर्मप्रारभ्यतेदिवा॥तत्रनास्त्यत्रवचोदृष्टंगृह्यवचनेय
था॥औपासनाग्निमन्यंवासमिध्यापहविर्भुजं॥पर्युक्ष्यपरिषिंचाग्निमलंकृत्यंचपूर्ववत्
हविष्यंपक्वमादध्याद्दधिघृतिस्नानलेपनत॥प्रोक्षोद्धृत्यघृतनाभ्यक्तंत्वदिष्टंयंनिधाय
च॥जुहुयात्सर्पिषाभ्युक्तंतैलक्षारविवर्जितं॥दध्नाक्तंपयसाक्तंचातदभावेवुम्मपिवा
सायणोये॥अन्नाभावेप्रवासेचतंदुलानौषधीस्तुवा॥पयोदधिघृतंवापिकंदमूलफला

निच॥योजयेदेवयज्ञादौजलंवापत्सुवाजले॥द्रव्यंस्रुवेणहोतव्यंपाणिनाकठिनंहविः॥सहस्ता
हुतिमेकैकामेकैकामेकैकामाहुतिंहुनेत्॥स्वाहाकारेणचैवाग्नौतात्सर्वंत्यागपूर्वकं॥माहार्ण
वे॥यत्किंचिज्जुहुयादग्नौतत्सर्वंत्यागपूर्वकं॥अन्यत्रकुरुतेयस्तुतद्धुतंतस्यथाभवेत्॥शौ
नकः॥त्रिधाविभज्यसिद्धान्नंत्रिःप्रोक्ष्यपुरतःस्थितं॥हविर्यद्देकपात्रस्थंमध्येदैवंतथोत्तरेभौ
तिकंपैत्र्यंकैयाम्यमानुषंचान्यपात्रके॥देवभूतपितृणांचतत्तद्भागेनवैक्रमात्॥उत्तानेनतुह
स्तेनत्वंगुष्ठाग्रेणपीडितं॥संहितांगलिपाणिस्तुवाग्यतोजुहुयाद्धविः॥हुत्वाहस्तेनस्रुपीय
सादिभिर्दर्भिभिस्तथा॥प्राजापत्येयुदस्पोक्तिवैश्वदेवेतुस्मृतिः॥पयुहेनोप्सृणाकुशोदेवय
ज्ञोयमोरितः॥कृत्वाथ्याहुतिभिश्चात्रहरेद्भूमिबलिंतथा॥भूतयज्ञप्रकुर्वितत्याग्नेहृन्नरदेव्र
तः॥एभिर्भूमिबलिंदत्वाप्राक्संस्थानिरंनरानृ॥मुत्क्रांतरालप्राक्संस्थानमरूसादिभिर्हरेत्

दृहापिभवतिस्वाहाकारेणनपितृयज्ञके अन्योन्यदत्ताबलेप्रत्यग्दिग्द्धायेतिबलिंहरेत॥यमायसंतराल
स्यहरेद्दक्षिणतोबलि॥याम्यादूलेरुदग्यामेपुरुषेभ्योवलिंहरेत॥प्राच्यांब्रह्मबलेहुत्वावरु
णायेतिमंत्रतः॥अस्यादुदक्वरुणःपुरुषेभ्योवलिंहरेत॥सोमायेसंतरालस्यहरेदुत्तर
तोबलि॥सौम्यादूलेरुदक्सोमपुरुषेभ्योबलिंहरेत॥जयंतस्वाहेत्वांस्त्वंनाहलोत्तत्वानि
रंतरात॥मुत्वांतरालमिंद्रादिदिग्देवानांबलिंहरेत॥इंद्रादिबलितः॥प्राच्यांयदास्यात्पुरुषोबलि
अंतरालेषलिनत्स्यानुत्विज्ञिष्टेमंत्रैरतःपरं॥रक्षोभ्यइतिसर्वासांबलिदुत्तरतोहरेत
भूतयज्ञोयमुदितःप्राचीनावीत्यतःपरं॥रक्षोभ्यइतिसर्वासांबलिस्वधापितृभ्यइत्यक्त्वा
दक्षिणस्यानुनिर्वपेत॥पितृयज्ञोयमुदितोनत्कंचैतत्रयंभवेत॥यंभवेत॥यथावन्हौमनुष्या
णांकर्त्तव्यस्तनकादिनाअग्नावेदाथवान्यत्रकेचिदाहुर्मनोषिणः॥तथाचसौनकः॥सूर्या

दिदग्निभिर्मंत्रैर्हुत्वा तु परिषिंचयेत्॥ ततो व्याहृतिभिर्हुत्वाभ्युदगग्ने वलिं हरेत्॥ चक्रमध्ये तु
पंचानां प्राक्संस्थं ब्रह्मपौरुषं॥ दक्षिणे चैव विश्वेभ्यः सर्वेभ्य इति पश्चिमे॥ उत्तरे त्वदिवे स्यादि
नक्तमिस्यादिना निशि॥ इंद्रान्यानुबले चक्राद्दक्षिणेभ्योथ बलिं हरेत्॥ तथा तनोपभागाश्चा
त्वाग्नेयेन निनयेद्बुधः॥ अपसव्यं स्वधेत्यादिमंत्रेण पितृतीर्थतः॥ नामगोत्रैः समुच्चार्य बलिं दद्या
त्ततो जलं॥ वितत्य यज्ञान्नशेषेण तथा नैऋत्यकोणके॥ पश्चाद्वायव्यकोणे तु शुनो वलिम्प्रथा
हरेत्॥ स्वाहाकारश्चोपवीति पितृतीर्थेन तयोः द्वैरूप्यामज्ञावल्लौचैनौ रुवानौ देवप्रणोदिनौः
देवत्वं वायाम्यादद्याद्बलिसुधीः॥ ह्यात्रिंशन्मंत्रकैरेतैर्गेहोनिस्य वलिं हरेत्॥ सनकादिमनुष्ये
भ्यो हंतकारेण दैवलिं॥ अग्नेर्दद्यादुपस्थानं कृत्वाथ गृहदेवताः॥ ब्राह्मणे गृहमध्ये तु दत्त्वादि
क्षाचतसृषु॥ सिध्यादिभ्यो वलिं दद्यात्समंतात्सूर्वतः क्रमात्॥ देवयज्ञान्नशेषेण गृहद्वारे व

लिंहरेत॥भूतयज्ञान्नशेषेणवायसेभ्यो बलिंहरेत॥सनकादिमनुष्येभ्योहंतकारेणैव बलिः॥अ
ग्नौदद्यादुपस्थानं कृत्वाथगृहदेवताः॥ब्राह्मणेगृहमध्येतु दत्वादिक्षाचनस्ततः॥सिध्यादिभ्यो
बलिं दद्यात्समंतात्पूर्वतःक्रमात्॥देवयज्ञान्नशेषेण गृहद्वारे बलिंहरेत्॥भूतयज्ञान्नशेषेण
वायसेभ्यो बलिंहरेत्॥नपश्येद्बलिवीरं दत्वा गृहबलिंद्विजः॥स्वयंनैवोद्धरेन्मोहादुद्धरेद्धि
विनश्यति॥चांडालेपतितेभ्यश्चपितृयज्ञान्नशेषतः॥वायसेभ्यो बलिंसत्रौनैवदद्यान्महा
तले॥येभूताःप्रचरंतीतिपात्रेदद्याद्बलिंसुधीः॥इत्थं कुर्याद्द्विजोयज्ञान्दिवानक्तं चनित्यशः
वैश्वदेवंदिवानक्तंनभवेद्वैपृथक्पृथक्॥प्रातरेवद्विरेवसाकर्तव्यंस्मृतिशासनात्॥स
र्यादिभ्योहुनेमुर्वमग्न्यादिभ्यस्ततःपरं॥हुत्वाव्यस्तैनिभिःपश्चाद्भूतयज्ञास्तथैवचा॥चशब्द

सितृयज्ञस्तथैवेति॥उपस्थानंसकृत्कार्यंसकृदेवगृहेबलिः॥दद्याद्वैवायसादिभ्योभूतेभ्य

श्वबलिं सकृत्॥ असंस्कृतप्रमीतानां श्वद्वारे निष्ठतियेमम॥ तेसर्वेतृप्तिमायांतु दर्वीधौतेन वारिणां॥
अथ विभक्तवैश्वदेवः॥ साग्नेयोप्येकपाकाश्चाः पुत्रभ्रातादयो यदि॥ न पृथक् वैश्वदेवास्युस्तपा
कान्निर्वपेत् यद्वि॥ एकपाकेन वसतां पितृदेवद्विजार्चनं॥ एकं भवेद्विभक्तानां तदेव स्यात्पृथक्
नथा च कारिका॥ कुर्वीत स्नानकश्चेदं पृथक्पाकी भवेत् यदि॥ अंत्याभावेष्यहरहः कर्तव्या
पायसाग्दिना॥ शाकलः॥ स्मृत्यर्थसारे॥ अविभक्ते न संसृष्टे वैकेनापि तु यत्कृतं॥ देवयज्ञादि
कं सर्वे लौकिकेग्नो दातं यदि॥ संस्कारं त्वाग्निनः सर्वे कुर्युर्नित्यं त्वसिद्धये॥ संसृष्टा भ्रातरः कु
र्युर्वं स्वयत्नं पृथक् पृथक्॥ होममुख्यश्च भोक्तव्यमन्नमौपासने हुतं॥ अन्यैश्च वनभोक्तव्यं
भोक्तव्यं लौकिके हुतं॥ अथ अनग्निकवैश्वदेवः॥ सायणीये॥ साग्निकः पितृयज्ञांते बलिक
र्मसमाचरेत्॥ अनग्निर्हुतशेषं तु बलिः काकबलिं हरेत्॥ संग्रहे॥ हुत्वाव्याहृतिभिश्चान्नं हुत्वा॥

शाकलकाहुतिभिः॥भूतेभ्यश्च बलिं दद्यादन्नमग्न्यायनग्निमान्॥धृत्वांगुष्ठस्य सव्यब्रह्मसूत्रं करस्य
तु॥दद्यादन्नं वैश्वदेवे पितृभ्यः सपिनापि तु॥अनग्निकस्तु यो विप्रः सोन्नं व्याहृतिपूर्वकं॥हुत्वा
शाकलमंत्रैश्च शिष्टं काकबलिं हरेत्॥अन्नं व्याहृतिभिर्हुत्वा हुत्वा मंत्रैश्च शाकलैः॥प्रजाप
ते हविर्हुत्वा पूजयेदतिथिं स्ततः॥अथ सूतके साज्यं॥वैश्वदेवं तथा श्राद्धं ब्रह्मयज्ञं च सूत
के॥न कुर्यात्स्वयमन्यैश्च कारयेन्नच सर्वथा॥तथा चास्मृत्यर्थसारे॥कुर्यात्स्यं च महायज्ञा
नित्यशः सूतकं विना॥नित्यं नैमित्तिकं काम्यं सूतके पितदापयेत्॥नित्यमौपासनं॥नैमिति
कमपरागस्नानादि काम्यमाग्निनेः॥चंडिकापुजनादिः॥सर्वथा न त्यजेत्॥अन्येन कारयेदि
त्यर्थः॥तथा च॥संध्यामिष्टं चरुं होमं यावज्जीवं समाचरेत्॥न त्यजेत्सूतकं चापि त्यजं जनाद्धे
दधो द्विजः॥नित्यनैमित्तिकं काम्यं यत्स्वकर्मप्रणोदितं सूतकादिनिमित्तेषु हापयेन्न तु हाप

येत्॥ सूतके मृतके चैव त्यशक्तः श्राद्धभोजने॥ प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत्॥ सूतके
तु समुत्पन्ने तस्मान्नैकधर्मं कथं भवेत्॥ पिंडयज्ञं चरुं होमं मम गोत्रेण कारयेत्॥ पितृयज्ञं पिंडपि
तृयज्ञं चरुस्थालीपाकं॥ होमं नित्यौपासनं चान्येन कारयेद्यदि समर्थः॥ अथ ब्रह्मयज्ञः॥ पूर्वसं
ध्यामधीते सर्वस्य इति स्मृत्यंतरं॥ स्मृतिः॥ प्रातेश्चैत्संगवादूर्ध्वं अंते वा नित्यकर्मणां॥ अथवा
वैश्वदेवांते ब्रह्मयज्ञस्त्रिधा स्मृताः॥ इति कालत्रयमुक्तं॥ नच्छोखांतरे ज्ञातव्यं॥ आश्वलाय
नानां कालमाह॥ शौनकः॥ अवनेजनो वगास्याथः कुशपाणिः स्तु बद्धच॥ ब्रह्मयज्ञं प्रकुर्वीत सं
ध्यामाध्याह्निकिर्तिः स्नानं कृत्वा मध्याह्ने द्विजः संध्यामुपास्य तु॥ ब्रह्मयज्ञं ततः कुर्यात्तर्पण
तनोरीयकः॥ अथ कारिका॥ ग्रामात्स्याच्यामुदीच्यां वा यत्रादिकस्यादनिदनः॥ अथो वगा
स्वतुस्नायादुपवीत्यचसन्द्विजः॥ धौतशुद्धांबरः कुर्यात्कर्मांगाचमनद्विजः॥ दर्भान्वहून् शु

चौदेशे प्रागग्रानास्तरणात्तथा॥ आश्वलायनः॥ सव्यस्यपाण्योरंगुष्ठप्रदेशिन्योस्तमध्यगाः॥ दक्षि
णस्यांगुलिनन्यस्य च तस्तोंगुष्ठवर्जिताः॥ तथास्वस्यकवांगुष्ठं दक्षिणांगुष्ठवेष्टितं॥ संबंधमे
वकुर्वीत न्यसेद्दक्षिणसकथिनो॥ कारिका॥ दर्भेषुपविष्टेषु कर्मण्यत्र प्राङ्मुखएव सन्नुत्क
त्तोपस्थं करसव्येदुत्ताने प्राग्दिगंगुलैः॥ शाकलः॥ वामसंयोजयेज्जंघं दक्षिणस्यास्तमुन्न
त्तम॥ पादेवान्यसेत्पादं दक्षिणस्यादुपस्थकं॥ पवित्रस्थापयेदुत्कं प्रागग्रे दक्षिणेभतु॥ नि
त्यं प्रागंगुलं तैन संदध्याद्दक्षिणं करं॥ ऊर्ध्वतो युगपत्स्ताद्धानेस्तने पदि चाक्षिणा॥ समोऽप्यपे
न चात्मानं समाहितमना भवेत्॥ सूर्यघनन्तमंपूर्वमभिसंधाय शक्तितः॥ ॐ पूर्वा व्याहृति
स्तिस्रस्समस्तास्तु सकृद्वदेत्॥ यस्त्वस्तपर्वत्र्यः सर्वा सावित्रोत्रिर्वदेत्तथा॥ पूर्वाभिसहितया
वनदर्द्वत्यसमाहितः॥ अग्निमिलदूत्यादीन्वादाश्चापि स्वशक्तितः॥ नमो ब्रह्मणे इत्येतात्रि

रुत्का प्रणवं वदेत्॥ प्रणवाद्येतदंतस्मान्मध्यमेन स्वरेण तु॥ अधीतेमनसो गत्वा स्वब्रह्मयज्ञं करोति
चेत्॥ सर्वत्रोंकारमुच्चार्य श्राद्धमंत्रेषु नोच्चरेत्॥ आर्षछंदांसि दैवतं हृद्यं तत् तर्पणं क. र्मणि ज्ञान
कः॥ आधमृ बद्ध चाः कुर्याद्ब्रह्मयज्ञं च तर्पणं॥ ततो निष्ठोरु पवैव स्त्रेमुपवीति समाचरेत्॥ स
माचम्य यजुः शाखो ब्रह्मयज्ञं समाचरेत्॥ पुनराचम्य देवादीन् संतर्प्येपनराचमेन्॥ अपां समि
पमागस्य तर्पयेद्दधि देवता अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु॥ एवमंतान्यन्त ष्यंतु वेसं
तः प्रति मंत्रकं॥ धातुनैवाथ परस्मैपदेन वचनयथा॥ सिंचे प्रजापतिस्तृप्यतु ऋत्विपो देवती
र्थेन॥ धातुस्तृप्तिर्यथालिंगमंत्रा नेषु प्रयुज्यते॥ मंत्रैः ज्ञातर्चेन तृप्यंत्विसादिभिरतः परं॥ प्र
तिमंत्रंनिवीति तु तर्पयेदृषीन् तीर्थतः॥ देवताः स्वपर्पयित्वा नु ज्ञातर्वोप्रभृतान् अथ॥ ऋषिन्द्यादव्य
संतर्प्य सनकाश्च सस्वैः॥ प्राचीनावीत्य पेद्दानोतर्पयेत्पितृन् तीर्थतः॥ सुमंतु सादिभिर्मंत्रैः प्र

ध॰मं॰
२९

त्रिमंत्रंचपूर्ववत्॥द्वितीयान्तेषुमंत्रेषुतर्पयामिपदंवदेत्पितरंचाथशर्माणंगोत्रस्तर्पयेत्क्रमात्
तथाचखिलसंहितायां॥तर्पयेत्पितॄंस्त्रीनादौततश्चैवतुमातरं॥सापत्नमातरंपश्चात्पितामह्या
दिदिकांस्त्रीन्क्रमात्॥आदौपितॄंस्ततोमातॄन्सापत्नजननींतथा॥मातामहान्सपत्नीकान्आत्मप
त्नींततःपरं॥सुतभ्रातृपितृव्यांश्चमातुलान्सहभार्यकान्॥दुहितृभगिनीश्चैवदौहित्रोभागि
नेयकः॥पितृष्वसामातृष्वसाश्वश्रुश्वशुरगुरुरर्थिनः॥एतेपितरस्तीर्थेतर्पयेच्चमहालये॥याज्ञव
ल्क्यः॥सर्वेभ्योपजलंदेयमसवर्णेभ्यएववा॥नामगोत्रस्वधाकारैस्तर्पयेद्दानुपूर्वतः॥स्मृ
त्यर्थसारे॥वसुरुद्रादिस्वरूपान्श्राद्धार्थेतर्पयेत्पितॄन्नामगोत्रंस्वधाकारैःप्रत्यहंतर्पये
त्सुधीः॥एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः॥अर्हंतिपितरस्त्रीन्।स्त्रीनूपश्चाश्चैकैकमंजा
लं॥मातृमुख्याश्चयास्तिस्रस्तासामप्यंजलित्रयं॥दद्यादेकैकमन्यासांस्त्रीणांचैवांजलिंबुधः

एम
२९

पितॄणां चैव देवानां जले दद्याज्जलांजलिं॥ असंस्कृतप्रमीतानां स्थले दद्याज्जलांजलिं॥ तिलदर्भपु
तं तोयं स्वधया पत्रदीयाने॥ ततो यमस्मृतं भूत्वा पितॄणां दत्तमक्षयं॥ भूमौ यस्तर्पणं कुर्या ह्यौ हेकु
से च मस्त्मये॥ तर्जन्यंगुष्ठयोगे च सपुत्रपितृघातकः॥ स्थले वापि शुचौ देशे कुशास्तीर्णे च भोजने
ताम्रादिके च पर्णे वा तर्पयेत्सलिलैर्जलैः पाणिनैकगुणं प्रोक्तं दर्भैश्शतगुणं ततः॥ अक्षय्यस्वरू
पात्रेण पितॄणां तर्पणं भवेत्॥ तर्प्पने येन तोर्थेन गृण्हीयात्तेन वै जलं॥ अन्यथा कुरुते यस्तु नरकं
प्रतिपद्यते॥ तिलतर्पणे॥ स्मृत्यर्थसारे॥ विवाहे चोपनयने चौले सति यथाक्रमं॥ वर्षमर्धं त
दर्द्धं तु न स्नेके तिलतर्पणं॥ ससप्तम्यां रविवारे च जन्मर्क्षादिवसेषु च॥ गृहे निषिद्धं सलिलं तर्प
णं सर्वदापि च॥ भानुवारे भौमवारे नंदाभगुमघासु च॥ त्रयोदश्यां तु सप्तम्यां भरण्यां कृत्तिकासु
च॥ अयनद्वितये चैव चतस्रषुयुगादिषु॥ पिंडदानेम दास्नानं कुर्यात्तिलतर्पणं॥ अर्कैः शुक्रे त्रयो

२८

ध० सि०
३०

दश्यांमघायांनिशिसंध्ययोः॥ग्रहेमृताहेजन्मर्क्षेनकुर्यात्तिलतर्पणं॥पवित्रंकौशिकंनाम्नंरजतंहे
ममेवच॥धारयेद्दक्षिणेपाणौपवित्रंचोत्तरेतरं॥तिलानामप्यभावेतुसुवर्णरजतान्वितं॥तद
भावेतुकुर्वीतदर्भैर्मंत्रैश्चतर्पणं॥इदंतुविस्तविषयं॥अथविशेषःकथ्यते॥प्रेतपक्षेव्यतीपा
तेसंक्रांतौतिथिपर्वसु॥निषिद्धेपिकर्त्तव्यंतिलतर्पणं॥नद्यांतीर्थेविशेषेषुप्रेतकार्येतथैव
च॥निषिद्धेपिदिनेकुर्यात्पिंडदानंतिलोदकं॥प्रेतपक्षेचगंगायामयनेगेतथैवच॥कृतोद्व
हेपिकुर्वीतत्तर्पणंतिलसंयुतं॥व्यतीपातेचसंक्रांतौयुगमन्वंतरादिषु॥तर्पयित्वापितत
न्यश्राद्धं कुर्यात्स्यलतः॥पक्षश्राद्धेहिरण्येचपश्चाद्दद्यात्तिलोदकं॥तथाचैवाष्टका
श्राद्धेश्राद्धेचैनुमासिके॥कृत्वानुमासिकंश्राद्धंसपिंडीकरणात्परं॥वैश्वदेवंततःकुर्यात
र्पणंतिलसंयुतं॥दर्शेतिलोदकंपूर्वंपश्चाद्दद्यान्महालये॥आब्दिकेनापरंपूर्वेपरेहनि॥

एम
३०

तिलोदकं॥ तीर्थश्राद्धे गयाश्राद्धे प्रसादे च महालये॥ परेहनि द्विजः कुर्यात्तर्पणं तिलसंयुतं॥
पक्षश्राद्धे सपिंडे च प्रेतश्राद्धेनुमासिके॥ परहेनि विरूपाख्येन कुर्यात्तिलतर्पणं॥ अथ श्रा
द्धाहे तर्पणं॥ पित्रोः प्रसाद्विके मासे तर्पणं तु कथं भवेत्॥ जलेनैव प्रकर्त्तव्यं निषिद्धे पितृक
र्मणि॥ श्राद्धं कृत्वा तु विधिवद्दैशाख्वदेवादिकं ततः॥ ब्रह्मयज्ञं ततः कुर्यात्तर्पणं तु तिलैर्विना॥
हारितः॥ ततः परेह्नि कुर्वीत तर्पणं पुरुषः सुधीः॥ तच्छेषेस्मिंल्लदमैस्कप्रातस्नात्वामतैर्जे
लैः॥ श्राद्धं कृत्वानुपूर्वेद्युः प्रातश्श्रायासरेहनि॥ पितृंश्चैवाथ संतर्प्य पश्चात्संध्यादिका
क्रिया॥ तर्पणं त्वमतं प्रान्तःद्वितीयपहरे पयः॥ तृतीये जलमिश्राहुश्चतुर्थे रुधिरं भवे
त्॥ प्रयोगपारिजाते॥ स्नात्वा तोरे समासाद्य त्यक्पविश्य कुशासने॥ संतर्पयेत्सितं स्तत्र
स्नात्वा वस्त्रं च धारयेत्॥ यस्तु तर्पयति प्रातः कृत्वा श्राद्धं परेहनि॥ पितरस्तस्य तिष्ठमायातिन

चं कुप्यति वैधृतं ॥ सरेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन् ॥ अतृप्ताः पितरस्तस्य शापं दत्वा व्र
जंति ते ॥ श्राद्धांगतर्पणं कुर्यात्सतिलं त्वापरे हनि ॥ पित्रोर्विषय एव स्यादन्येषां त्वविषयेभवे
त् ॥ जीवमानः पोनाथस्यमातायदिवियद्यते ॥ मनुः ॥ मातुः श्राद्धं स्तुतः कुर्यान्नकुर्यात्तिलतर्प
णं ॥ ॥ इति प्रसंगागतः कथितं ॥ अयं तु ब्रह्मयज्ञात्स्थ भिक्षादानादि दक्षिणा ॥ कुर्यादिति पृथ्व्या
नो वा ब्रह्मयज्ञमसंभवेत् ॥ देशेऽशुचिरत्वयं वा स्यान्न दानध्याय मिष्यते ॥ प्राग्रूर्ध्वं वाम वैश्व
यवैश्वदेवाख्यकर्मणः ॥ ऊर्ध्वं मनुष्ययज्ञस्तु स चेष्टोतिथिपूजनं ॥ स्वशक्त्या भोजयेद्विप्रान्
अतिथिः समयागतान् ॥ ॥ मनुः ॥ विद्यातपः समिद्धेषु हुतं विप्रमुखाग्निषु ॥ निस्तारयति दुर्गा
च्च महतश्चैव किल्बिषात् ॥ इति धर्मप्रवृत्तौ श्लोकाचादितर्पणांतं प्रकरणं ॥ अथ यदि नातीनक
र्मण्याह ॥ नष्टकृतानि प्रमादाच्चैव प्रातः कर्मणि यानि च ॥ रात्रावपि च कर्माणि विनासौरं च तर्पणं

दिवोदितानि कर्माणि प्रमादादकृतानि वै ॥ शर्वर्याः प्रथमे यामे तानि कुर्यादनुक्रमात् ॥ रात्रौ प्रहरपर्यंतं
दिवाकर्माणि कारयेत् ॥ अवगाहं च सौरं च ब्रह्मयज्ञं च वर्जयेत् ॥ दिवोदिताः क्रिया कार्या रात्रावपि यथाक्र
मं ॥ अवगाहं विना सौरं ब्रह्मयज्ञं च तर्पणं ॥ केचिद्रात्रावपि ब्रह्मयज्ञमिच्छंति मानवाः ॥ ग्रामे न सास्वाध्याय
मघोयोतदिवानक्तं चेत्यापस्तंबविषयं ॥ तथा च स्मृतिः ॥ आचार्या केचिदिच्छंति रात्रावपि तु तर्पणं ॥ त
द्यजुः शाखिनामेव नामेव नान्येषां तु विधीयते ॥ मध्यान्हे समतिक्रांते सायंकाले भवेद्यदि ॥ सायं
संध्यामुपास्यादौ संध्यां माध्यान्हिकीं ततः ॥ सायंकाले व्यतिनश्चेदस्तं यातेदिवाकरे ॥ कुर्याद्राव
र्तेनो संध्यामुपास्यादौ यथाक्रमं ॥ आवर्तेनो मध्यान्हस्तस्ये संध्ये सर्थः ॥ कुर्वितावतनो संध्या
रात्रावपि न दुष्यति ॥ दद्यादर्घ्यं तु गायत्र्या सौरसूक्तं विवर्जयेत् ॥ मध्यान्ह संध्या रात्रौ चेत्सम
दाक्रियते यदि ॥ सौरस्थाने जपेत्सूक्तं सौरं वैश्वानरीयकं ॥ ॥ अथ देवार्चनविधिः ॥ अग्नौ वैवा

(३७)

ध०मं०
३२

यस्त्वैर्वा प्रतिमां याजयेपि वा॥ पूजयेद्भक्तिभावेन प्रत्यहं परमेश्वरं॥ नारायणं महादेवपादित्यं गणना
यकं॥ शक्तिं चैवाथ पंचैतान् प्रत्यहं पूजयेद्विजः॥ देवतास्थापयेद्वार स्थावरे प्राङ्मुखादितु॥ गना
हादौ जंगमे वापि स्थापयेत्स्वस्यगाननं॥ अभिष्टदेवतो मध्ये स्थापयेन्नान्यथा क्रमं॥ यदा मध्ये भ
वेद्विष्णुरीशान्यां पूजयेद्धरिं॥ आग्नेयां पूजयेत्सूर्यं नैऋत्यां गणनायकं॥ वायव्यां पूजयेद्देवीमो
शेता चैव यथाक्रमं॥ तथा च संग्रहे॥ शंभुमध्यगते हरिनहरभूदेव्यो हरौ शंकरेभास्येनागसु
नारवौ हरगणेशाजांविकास्थापिताः॥ देव्यां वेह्महरैकदेतरवप्रोलंबोदरेजखरेनायीः
शंकरभागदस्तु शुभदा व्यस्तास्तु ते हानिदाः॥ अथागमविषये प्राचीस्फुच्यते॥ पूज्यपूज
कयोर्मध्ये पूर्वमित्यभिधीयते॥ नैशानं पूजयापेक्ष्य पूज्योपेक्षतु तद्भवेत्॥ देवस्य मुखमाल
क्ष्य दिशाप्राच्यो प्रकल्पयेत्॥ तदादि परिक्षीणां मंगाधावरणं क्रमात्॥ यस्मिन्विवस्वान्विषु च

राम
३२

स्कंदेति प्राचोदितां वेदविदो वदंति ॥ मध्ये पुनः पूजकः पूजयेश्च सदागमः ॥ तान्प्रवदंति संवः ॥ मुखेपु
ष्पांजलिं दत्वा गणेशाद्यर्चनं भवेत् ॥ गणेशाएवमुख्यश्चेत्तत्र सूर्यं क्रमाद्भवेत् ॥ गणेशा कौस म
ध्यमेशौ वा विष्णुं प्रपूजयेत् ॥ अर्चयेच्च शिवं पश्चाच्छिवं मादौ तु वैष्णवाः ॥ ततो विष्णुस्ततो दुर्गा मे
वं स्यादर्चनक्रिया ॥ अर्चयेदथवा विप्रं शिष्टाचारो यथा भवेत् ॥ हेमराजन नाम्नांणां सर्वेषां मध्ये
भाजनं ॥ शिवस्र्योपरि त्यज्यशंखोन्यत्र प्रशस्यते ॥ आवाहनासनं पाद्यमर्घ्यमाचमनीयकं ॥
स्नानवस्त्रोपवितानि गंधपुष्पं च धूपकं ॥ दीपं नैवेद्यतांबूलौ प्रदक्षिणं विसर्जनं प्रस्कं च पूजये
द्देवं स्नापयेत्सुरुषेण वा ॥ शालग्रामे स्थावरे च नावाहनविसर्जनं ॥ शालिग्रामशिलायां तु नि
संसंविहितो हरिः ॥ स्नापयित्वार्चयेद्देवं यदिच्छेत्सुण्यमात्मनः ॥ चर्मपर्येष्टक आयाते पाषाणेनो
पवेशयेत् ॥ स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकं ॥ अंगलग्ना चाजीर्णा च वस्त्र देवेन चार्पये त्

नांगुल्यामर्दयेद्देवं नाधःपुष्पैः समर्चयेत्॥ करागैन क्षिपेत्तोयं वज्रापातकसंभवेत्॥ जलपूर्युषितं
साज्यं पात्राणि कुसुमानी च॥ तुलस्यागस्य बिल्वं चंनवर्जं जान्हविजलं॥ नाक्षतैरर्चयेद्विष्णुं तुल
स्या गणेश्वरं॥ दुर्गाभिर्नोर्चयेद्दुर्गां न केतक्या महेश्वरं॥ शालग्राम शिलामेव नाक्षतैरर्चयेद्विजः
अर्चयेद्यदि यो मोहात् पुजा तस्य तु निःफला॥ मृन्मये भिन्नपात्रे च पाषाणे लोह काष्टके॥ पलुवे
कर स्तूमोस्तु नैवेद्यं च न दापयेत्॥ सौवर्णं राजतं ताम्रं कास्यं पालाशपत्रकं॥ नैवेद्याया जपेत्
पात्र विष्णोर् तिप्रिये॥ पवित्रं विष्णुनैवेद्यं सुर सिद्धार्षिभिः स्मृतं॥ अन्यदेवस्य नैवेद्यं भुक्ता
चांद्रायणं चरेतु॥ अग्न्यात्याशिवनिर्माल्यं पत्र पुष्पफलं जल॥ शालग्रामस्य संपर्कात्सर्वे या
ति पवित्रता॥ योर्चयेद्धि घिवद्भक्त्या परानो तैश्च साधनैः॥ पूजाफलाद्दमे वास्य न समग्रफलं ल
भेत्॥ एकं विनायके कुर्याद्द्वे सूर्ये त्रीणि शंकरे॥ चत्वारि केशवे दद्यात्सप्त शक्तेः प्रदक्षिणा॥ सम

भ्यर्चपि वेदेवान्यःपादं सलिलं हरेत्॥ चत्वारि केत्रोवेद द्यात्सत्रान्ते यःप्रदक्षिणा॥ समभ्यर्च्यापि
वेदेवान्यःपादं सलिलं हि ह्निणोपरमं पदं॥ यःपादसलिलं विष्णोः करेणपोबते यदि॥ समूढोनर
केयोतियावदिंद्राश्चतुर्दश॥ अथ निसश्राद्धं॥ तत्रेदं गत्वस्य सूत्रं॥ यस्मिन्नभ्योद्दाति सपितृ य
हरतितथाचमनुः॥ स्वाध्यायेनार्चयेत्तेषां होमैर्देवायथाविधिः॥ पितृह्द्विधानेन अन्नैर्मुतानि
कर्मणां॥ कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहत्॥
एकमप्याशयेद्विप्रंपित्र्यर्थेपंचयज्ञकं॥ नचैवप्राशयेत्किंचिद्वैश्वदेवं प्रतिद्विजं॥ ॥याज्ञव
ल्क्यः॥ निसश्राद्धं देवहीनं नियमादिनिवर्जितं॥ दक्षिणारहितं चैव दातृभोक्तृव तोज्झितं॥ आवाह
नं स्वधाकारं पिंडाग्नौकरणादिकं॥ ब्रह्मचर्यादिनियमान्विश्वेदेवास्तथैवच॥ निसश्राद्धे त्य
जेद्धाताभोज्यमन्नं प्रकल्पयेत्॥ भोक्तृभावेर्थचैवान्नं गोभ्यश्चैवनिवेदयेत्॥ निसश्राद्धमदैवस्या

32

दर्घ्यपिंडादिवर्जितं॥ नाममंत्रेन होमं च नावाहनं न विसर्जनं॥ श्राद्धादिनित्यमौ नास्ति किंचिद्दत्वा विस
र्जयेत्॥ षट् दैवत्यं भवेच्छ्राद्धं कर्तव्यं प्रत्यहं द्विजैः॥ नित्यकर्मसमाख्याय ब्राह्मणश्राद्धयान्वितं॥ अ
पसव्येन कर्तव्यं नित्यश्राद्धमदैवतं॥ पितानुद्दिश्य विप्रस्य भोजनं मन्यमवस्य वा॥ यावत्सप्ताल
नं कुर्यान्नामगोत्रसमुच्चरन्॥ अर्चयेदासनं दत्वा नमो वः पितरस्ततः॥ गंधपुष्पादिकं दत्वा भो
ज्यान्नं परिवेशयेत्॥ ये चेह त्येतमश्चैव पितृणां स्तृप्तिमाचरेत्॥ ब्रह्मार्पणं ब्रह्म हविरित्युक्त्वा
विनिवेदयेत्॥ बालः सुवासिनो वृद्धास्तथैवास्करकन्यकासभोज्यातिथिभृत्यांश्च दंपत्यौ शे
षभोजनं॥ चित्राहुतिप्रदानं तं कृत्वा भोजनमाचरेत्॥ सपत्नौ ब्राह्मणस्यापि भुंजीयात्सह
बंधुभिः॥ अथ भोजनविधिः॥ मनुः॥ सायंप्रातर्द्विजातीनामशनं स्मृतिनोदितं नांतरा भोजनं
कुर्यादग्निहोत्रसमो विधिः॥ गोभिलः॥ ततो भोजनवेलायां कृत्वाचारं सदात्मवान्॥ पोष्यवर्गस

मोपेतो भोजनं कारयेद्बुधः॥ माता पिता गुरुर्भ्राता पुत्रो दासस्तथैव च॥ अभ्यागतोतिथिश्चाग्नि
पोष्यवर्गः इति स्मृतः॥ स्मृतिसमुच्चये॥ प्राङ्मुखस्तु समश्नीयात्स्नतो ध्यां वा यथासुखं॥ उत्तर
पितृकृत्येषु दक्षिणे तु विसर्जयेत्॥ मनुः संग्रहे॥ आयुष्यं प्राङ्मुखं भुंक्ते यशस्वि दक्षिणामुखः॥
श्रीकामः पश्चिमा भुंक्ते न कदाचिदुदङ्मुखः॥ कृतवान्स्वगृहे नित्यं नाश्नीयादुत्तरामुखः सोमवा
रे तथाभ्यंगं वर्जयेत्तु तथा बुधः॥ अथ भोजनमंडले॥ बौधायनः॥ चतुरस्रं त्रिकोणं च वर्तुलं
चार्द्धचंद्रकं॥ कर्त्तव्यमनुपूर्वेण मंडलं ब्राह्मणादिषु॥ शूंखः॥ आदित्या वसवो रुद्रा ब्रह्मा चैव
पितामहः॥ मंडलं तु पत्नी वेति तस्मात्कुर्वीत मंडलं॥ पितामहः॥ यातुधानाः पिशाचाश्च स्यात्सरा राक्षसो
तथा॥ घ्नंति बलिमन्नस्य मंडलेन विवर्जितं॥ अथ कांस्यपात्रं एक एव तु यो भुंक्ते विमले कांस्य भा
जने॥ चत्वारि तस्य वर्द्धंते आयुः प्रज्ञा यशो बलं॥ बलाद्धि ज्ञातिकादर्वागतऊर्ध्वं यथेच्छया॥ इद

33

मेवंगृहस्थानांतथ्यनेब्रह्मचारिणां॥पंचार्द्रोभाजनंकुर्यात्प्राङ्मुखोमौनमास्थितः॥हस्तौपादौतथैवा
स्यमेषुपंचार्द्रतामता॥धारणाहेतथाश्राद्धेवर्जयेत्कांस्यभोजनं॥मोहाद्योयदिभुंजीतव्रतंकर्मं
चनिःफलं॥भोजग्रात्यपात्राणि॥रंभाकुटजमध्वाम्रजंबुफणसचंपकः॥पद्मोदुंबरपालाश
ब्रह्मपत्रंपवित्रकं॥अथनिषिद्धकं॥वटार्कश्वत्थपर्णेषुकुंभीतिंदुकपर्णयोः॥कोविदारकदंबा
नांभुक्त्वाचांद्रायणंचरेत्॥करेखर्परकेचैवशिलायांताम्रभाजने॥भिन्नकांस्येचवस्त्रेचनभुंज्या
त्तथायसे॥शाकादिषुरतस्याप्यमध्येन्नंपरिपेषयेत्॥परिविष्टंचगायत्र्याघृतान्नमभि
मंत्रयेत्॥अन्नमध्येप्रतिष्ठाप्यदक्षिणेघृतपायसं॥शाखादिषुरतस्याप्याभक्ष्यभोज्यंच
वामतः॥पात्रंघृत्वातुवामेनयावत्स्याद्भोजनंहितत्॥पाणिनादक्षिणेनैवपर्युक्ष्यपरिषेच
येत्॥अंगुष्ठतर्जनीचैवमध्यमाचततोयकं॥तिस्त्रेत्येकांगुलिचैवप्रशस्तास्यात्रधारणे॥सत्यं

त्वन्नेन वैश्वानर वारिणा परिषेचयेत्॥ सायं काले तथैवास्यादनं त्वाचादित्तः क्रमात्॥ अन्नेनैव
ह्यनान्नेन नमस्कारेण वै भुवि॥ निःस्वएवा दुनिद द्याह्नो जेना दौतु दक्षिणा॥ सायलिये॥ उध
स्य किंचिदन्नाग्र्यं धर्मराजाय वै बलिं॥ दत्वाथ चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरेत्॥ स्मृतिः॥ ब
दरि फलमात्राभंमंगुल्यग्रैर्भुवि क्षिपेत्॥ यमधर्माय चित्राय भूतेभ्यश्च नतो जलं मनुः॥ द
त्वातु चित्रगुप्ताय हस्तं प्रक्षालयेद्द्विजः॥ अप्रक्षालितकरौ भुंक्ते रौरवं नरकं व्रजेत्॥ चित्रा
हुतिरनुद्धृत्य भुंक्ते यः ग्रासपंचकं॥ अथ संकेवलं भुंक्ते स्नानतो स्नानतो पिबा॥ चंद्रिकायां॥
भोजनादौ बलिर्भुक्तः समुद्धृत्य हि भोजनं॥ अनुद्धृत्य तु यो भुंक्ते प्राणायामाष्टकं चरेत्॥ उ
त्क्रामतोपस्तरणमसोस्वाहांतमुच्चरेत्॥ आपोशनामिति प्राहुर्भोजनस्य दौ पिबेज्जलं॥ आ
पोशनमकृत्वा यो भुंक्ते द्विजसत्तमः॥ अभोज्यं नद्भवेदन्नं भुक्त्वा चांद्रायणं चरेत्॥ आपोश

धर्म॰
३६

नकेरे कृत्वा पात्रे कृत्वा तिलोदकं॥ स्नानमुत्रसमं तोयं पुनः पूरयते यदि॥ आपोशानार्थं यत् तोयं धृतं
चेन्निःसृतं यदि॥ हस्तं प्रक्षाल्य तोयेन पुनश्च धारयेज्जलं॥ आपोशानकरे विप्राय यद्याशिर्वचनं प
ठेत्॥ अभोज्यं तद्भवेदन्नं दाता भावति किल्बिषी॥ अश्वं वा प्रतिगृह्णीयाद् गजं वा गजमेव च अ
न्नं न प्रतिगृह्णीयात् स्यालैः कंटगतैरपि॥ संग्रहे॥ सर्वे हि तरितं शक्तुमन्नले पोहि दुस्तारः॥ दुष्ट
नं हि मनुष्याणां मन्नमाश्रित्य तिष्ठति॥ अन्नं न प्रतिगृह्णीयादिति पूर्वतः॥ अन्नं ब्रह्म रसो वि
ष्णुर्भोक्ता देवो महेश्वरः॥ एवं ध्यात्वा द्विजो भुंक्ते त्यन्नदोषैर्न लिप्यते॥ प्राणाहुतिरहत्वा
तु पश्चादन्नं परिमर्दयेत्॥ मदितेभोजयेद्यस्तु भुक्त्वा चांद्रायणं चरेत्॥ घृतहीनं तु यो भुंक्ते
नरस्त्वाहुतिपंचकं॥ पश्चात्यतेन यो भुंक्ते द्विजश्चांद्रायणं चरेत्॥ अभ्यज्य सर्पिषैकै वा
प्राणानाये वचो हुतिं॥ सगत्य विधिना मुच्चैहुनैत्प्राणाहुती द्विजः॥ स्मृतिसारसमुच्चये॥ त

राम
३६

र्जनीमध्यमांगुष्ठैः प्राणस्यैवाहुतिर्भवेत्॥ मध्यमानामिकांगुष्ठैः रपाने चाहुतिं क्षिपेत्॥ कनिष्ठाना
मिकांगुष्ठैर्व्यानस्य तदनन्तरं॥ कनिष्ठतर्जन्यंगुष्ठैरुदाने चाहुतेर्बुधः॥ सर्वांगुलिभिरुदायस
मानस्याहुतिर्भवेत्॥ अनेन विधिना विप्रो वाग्यतो भोजनं चरेत्॥ जीवत्पितृकस्य भोजने
मौननिषेधः॥ स्मृतिचंद्रिकायां॥ कनीयान्सपितृश्चैवमुक्त्वा श्राद्धिकभोजनं प्राणाग्निहो
त्रेदंन्यत्र न समौनं समाचरेत्॥ यदि भुंजीत वैतृष्णां सर्वत्रैव तु भोजने॥ स पापः पितरं हंति
भ्रातरं संततिं ध्रुवं॥ भोजनं श्राद्धिकं भुक्त्वा कनीयान्सपिता युवा॥ मौनं भोजनपात्रे च धार
णं परिवर्जयेत् वाग्यतो भोजनं कुर्यात् ब्रह्मचारि सदैव हि॥ कनीयान्सपिता वा स्यान्न स पापे
न युज्यते॥ पंचप्राणाहुतिर्हुत्वा ब्रह्मग्रंथो विसृज्यते॥ प्रक्षाल्य वामहस्तं तु पश्चाद्भोजनमा
चरेत्॥ तर्जन्यां तु स्थितं तेन स्यो ब्रह्मग्रंथो च मुद्दनि कनिष्ठिका स्थिते रखद्रे नैवैभोजनमाचरेत्

धर्म०
३७

हुत्वा प्राणाहुतीरन्नं किंचिद्धैस्यो पयेत्पृथक्॥ यद्यद्दारे क्षितं चाद्यास्थितमंते तु भोजयेत्॥ अ
निधाय पृथक् स्वान्नं गायत्र्यात्वभिमंत्रितं॥ पुनरन्नं च गण्होयाद्यदि भुंजित कोलिविषि॥ म
नुः॥ मधुपर्के च सोमे च त्वप्सु प्राणाहुतीषु च॥ आज्यहोमेषु सर्वेषु नोच्छिष्टं मनुरब्रवीत्॥
दक्षिणे तु परिस्तार्ज्य वामे निरनिधाय च॥ अभोज्ये तद्भवेदन्नं पानीयं सुरया समं॥ जल
पात्रं तु निक्षिप्य मणिबंधं च दक्षिणे॥ भुक्तकाले तु विप्रो वै पिवेदन्यत्र पाणिनां॥ एकपंक्त्यु
पविष्टानां विप्राणां सह भोजनं॥ यद्येकोपि त्यजेत्पात्रं शेषमन्नं न भोजयेत्॥ भुंजानेषु च
विप्रेषु योग्रे पात्रं विमुच्यति॥ समूढो नरकं याति ब्रह्महा स तु जायते॥ अग्निना भस्मना व
वदेर्भेण सलिलेन वा॥ अंतरे द्वारदेशे तु पंक्तिदोषो न विद्यते॥ एकपंक्त्युपविष्टानामन्यो
न्यस्पर्शते यदि॥ भुक्त्वा तदन्नं न सार्ज्यं गायत्र्या तु शतं जपेत्॥ स्मृतिः॥ भवेदुच्छिष्टं स्वस्पर्शो

एम
३७

भोक्तुर्वा भोजनस्य वा ॥ अन्नं न देव भोक्तव्यं यदि भूर्जिं न किंचिद्विषो ॥ न ते श्वैव जपेद्देवीं शतम ष्टो

त्तराधिकं ॥ शेषमुद्धृत्य भोक्तव्यं श्रूयते मातृकारणं ॥ तस्मोदद्यादन्नशेषं भूमौ दुर्गेति तत्स ये

॥ भुक्त्वा पीत्वा तु यस्तात्रं रिक्तं त्यजति यो नरः ॥ स नरः क्षुत्पिपासार्तो भवेज्जन्मनि जन्मनि ॥ यत्र

कं चन संस्थानं क्षुत्तृष्णोपहतात्मनां ॥ अर्थिनामुदकं दत्तं अक्षय्यमुपतिष्ठतु ॥ अहं पिबंतिं गं

डूषं मध्ये त्यजति भूमिषु ॥ प्राणं ति पितरः सर्वे ये चान्ये भूमिदेवताः ॥ यद्यतिष्टेदनाचांतो भुक्त

वानासनाद्द्विजः ॥ सद्यः स्नानं प्रकुर्वित नान्यथा प्रयातो भवेत् ॥ अंगिराः ॥ उच्छिष्टोच्छिष्टसंस्य

ष्टश्शुनाऽशूद्रेण वा द्विजः ॥ उपोष्य रजनीमेकां पंचगव्येन शुध्यति ॥ स्नानं च शूद्रमुच्छिष्टत्यानु

च्छिष्टस्तु यः स्पृशेत् ॥ स्नानं विधीयते तत्र पात्राणां चालनं विना ॥ स्मृतिः ॥ गंडूषं करणात्पूर्वं ह

स्तं प्रक्षालयेद्द्विजः ॥ हस्तं दैवं च पित्र्यं च आत्मानं चोपपातकैः ॥ गौतमः ॥ यो वै गंडूषसमये तर्जं

धर्म
३८

न्यां चक्रवालनं॥कुर्वीत यदि मूढात्मा रौरवं नरकं व्रजेत्॥आचांतेनैव शुचिस्तावद्यावत्सात्रं नचोद्धरेत्॥उद्धृतेपि शुचिस्तावद्यावद्भूर्न्नप्रमार्जिता॥रात्रौ भोजनकाले तु यदा दीपो विनश्यति॥पात्रं धृत्वा तु पाणिभ्यां भास्करं मनसा स्मरेत्॥दृष्टां तेन पुनर्दीपं तच्छेषं भोजयेन्नरः॥पुनरन्नं न भोक्तव्यं यदि भुंजीत किल्विषी॥परपाकनिवृत्तस्य वैश्वैवर्षार्द्धमेव च॥याचये छ्रोत्रियस्यान्नं न दभोक्ते जलं पिवेत्॥श्रोत्रियस्यारशिष्यार्त्विक्तुतातिश्वशुरमातुलाः॥एषमन्नं न दुष्यंति उपाध्यायस्यवैवहि॥अथनिषिद्धानं॥ब्रह्मोदनेन तथो चौले सोमंते प्रथमार्नवे॥मासिके च तथा कृच्छ्रेनैव शूद्रान्नं नाश्नीयाद्विजसत्तमः॥नग्नश्राद्धेनवश्राद्धे सपिंडिप्रेतकर्मसु॥प्रायश्चित्तेन भुंजित भुत्क्का चांद्रायणं चरेत्॥तिथिपरत्वेव ज्यें॥सप्तम्यां रविवारे च दिवा रात्रौ न यैवतु धात्रोः प्रतिपदादिषु॥शिरः कपालमंत्राणि नखचर्मास्थि लोमस्तथा॥यदि छेदूर्ध्वगामित्वमष्टम्यादि

धर्म
३८

षुवर्जयेत्॥ वर्जयेत्खेन रत्नानां कमलांबु वर्तुलं तथा॥ छत्रकं वर्तुलं चैव स्फ करं भासुरं तथा॥ दंता
कं हस्तकालिंगं बिल्वोदुंबरमिस्सदा॥ एतानि सच तेयस्तु नस्यदुरगतो हरिः॥ पयस्यन्नतु यदा भुंक्ते
पात्रगे प्रेरितं यथा॥ पर्वतश्री जपेन्मंत्रं शतवारन्न कल्मषं समानमुस्य मंत्रं च सहस्रं तु भवेद्य
दा॥ अस्तिवस्तु जपेन्मंत्रं सहस्रं न क कल्मषं॥ समानमुस्ये मंत्रं च सहस्रं तु भवेद्यदा॥ अस्तेव स्त
जपेन्मंत्रं सहस्रं तु भवेद्यदा॥ अस्तेवस्तु जपेन्मंत्रं सहस्रं न क कल्मषं॥ युद्धाय द्रावो युःस्तु नं
जपे द्वात्र्या जलंपि वा॥ गणिकान्नं तदा भुंक्ते तदा पापात्समुते॥ अन्नं भुंक्तं यदा यस्तु सुवर्णस्ते
यमंदिरे॥ इंद्रानुपूषणं स्तु नं सहस्रं वै जपेज्जलो॥ स्तोत्रमंत्र जपेन्मंत्रं शतवारं जलेपि वा॥ कुष्ट
न्नं चापि यो भुंक्ते विमुच्येत स कल्माषात्॥ ब्रह्मघ्नस्य गृहे भुंक्ते किल्बिषान्मुच्यते तदा॥ एहि
वां प्रजपेन्मुक्तं सहस्रं तु जलेयदा॥ यएतं प्रजपेन्मुक्तं सहस्रं विष्णुमंदिरं मू पापात्समुच्यते स

37

धं०मं०
३९

संभुंक्ते गेहं सुरापिनं ॥ शुत्रं ते प्रजपेत्सूक्तं शिवस्यानैसहस्रकं ॥ तत्स्य गहे भुंक्ते तदा पापात्प्रमु
च्यते ॥ आयुवानो जपेद्दुर्गे शतवारं जलेयदा ॥ दीर्घरोगो गृहे भुंक्ते मुच्यते कल्मषात्तदा ॥ अ
पेतीति जपेत्सूक्तं श्राद्धे भुंक्ते तु षोडशे ॥ तदा पापात्प्रमुच्येत त्रिशद्वारि जलेस्थितः ॥ विभ्राट् बृ
हज्जेपेत्सूक्तं सपिंडि भोजने जले ॥ प्रेतस्योनथवान्येषु त्रिशद्वारं न कल्मषं ॥ भुंक्ते तु मासिके प
क्वे तदा पापात्प्रमुच्यते ॥ अद्द्वाद्व जपेन्मंत्रं दशवारं जलेयदा ॥ निसंश्राद्धयदा भुंक्ते त
स्मात्पापात्प्रमुच्यते ॥ दूरावतो जपेन्मंत्रं दशवारं न संशयः ॥ सोमं ते च्ययदा भुंक्ते मुच्यते कि
ल्बिषात्तदा ॥ ससेनोत्तभितामंत्रं जपेदश्वत्थसंन्निधौ ॥ उत्सवेषु यदा भुंक्ते मुच्यते पात
कात्तदा ॥ केष्टानरे जपेत्सूक्तं एकवारं प्रशस्तकं ॥ भुंक्ते यन्वादिके श्राद्धे कल्मषं नैव लिप्य
ते ॥ ऋतेन ऋतयत्सूक्तं मेकरे जपेद्बुधः ॥ भुंक्ते युगादिके श्राद्धे न तदा पापात्प्रमुच्यते ॥ नतमं

राम
३९

होनं जपेत्सूक्तं दशवारं शिवालये॥ भुंक्ते योन्वष्टकाश्राद्धे तदा पापात्प्रमुच्यते॥ त्वेषंगणंज
पेन्मंत्रं दशैव विष्णुमंदिरे॥ व्यतीपाते यदा भुंक्ते तदा पापात्प्रमुच्यते॥ तो अज्येष्ठा जपेन्मंत्रं द
शैव विष्णुमंदिरे॥ द्विवारं चेद्दिवा भुंक्ते किल्विषात्तु प्रमुच्यते॥ वयोमयै जपेन्मंत्रं शतसंख्यान्शि
वालये॥ रात्रौ द्विभोजनं चेत्तु स्यात्कल्मषं नैव सर्वथा॥ मिमातु द्यौ जपेन्मंत्रं शतवारं शिवा
लये॥ भार्यायासह यो भुंक्ते तस्माद्दोषाद्विमुच्यते॥ दले अग्निं जपेन्मंत्रं शतवारं यथा तथो
पंचयज्ञविहीनस्य गृहे भुंक्ते न पातकं॥ बहवश्चैक पात्रेषु भुंजते नैव कल्मषं अज्येष्ठा॥
सो जपेन्मंत्रं दशवारं न कल्मषं॥ श्वानादिदर्शनं कृत्वा पश्चाद्भुंक्ते यदा तदा॥ उदुत्तमे ज
पेन्मंत्रं दशवारं न कल्मषं॥ रजस्वलोणां ध्वनिं श्रुत्वा पश्चाद्भुंक्ते न कल्मषं॥ अग्ने मरुद्भि
र्मंत्रैश्चेत्किल्विषं न शतं जपेत्॥ पंचकस्यैव न भोक्तव्यं मन्यतु प्रसहं द्विजैः॥ अज्ञानाद्यस्तु

भुंजीत तस्यैव नास्ति निष्कृतिः॥ अथ वमनविधिः॥ उत्तराचमनात्पूर्वं वमनं यदि जायते स्नानं तत्र न क
र्त्तव्यं गंडूषैः शुद्धिरुच्यते॥ उत्तराचमनोंपोत्वा त्कुरुते वमनं यदि॥ तत्र स्नानेन शुद्धिः स्यादिति प्रा
हुर्मनीषिणः॥ सर्वत्र वमने स्नायात् तथा शौकानुपातने॥ अश्नं भुक्त्वा रात्रौ च सर्वदा॥ अनस्नान
माचरेत्॥ अथ तांबूलविधिः॥ तांबूलं चर्वणं कुर्याद्भुक्त्वा रात्रौ च सर्वदा॥ अभ्यंगे चैव मांगल्ये दि
वा वास्वथ वा निशि॥ प्रातःकाले फलाधिक्यं चूर्णाधिक्यं तु मध्यमा॥ पर्णाधिक्यं भवेद्रात्रौ लक्ष्मि
वान्स नरो भवेत्॥ पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः॥ चूर्णपर्णं हरेत्यायुः शिरा बुद्धिविनाश
नं॥ मूलमग्रं परित्याज्य शिराश्चैव परित्यजेत्॥ सचूर्णं खादयेत्पर्णमायुःश्रीःकीर्त्तिवान् भवेत्
अनिधाय मुखे पर्णं पूगं खादति यो नरः॥ सप्तजन्म दरिद्रः स्यात्तेनैव स्मरंते हरिं॥ पंच सप्ताष्ट
पर्णानि दश वा दश वापि चाददात्स्वयं च गृण्हीयाद् दतिके चेद्दुर्दीरितं॥ तर्जन्या चूर्णमादाय तां

बूलान न तु खादयेत्॥ यदि वा न खादयेन्मूढः नरकं प्रतिपद्यते मध्यमांगुलिमादाय चूर्णस्य लेपयेत्
अंगुष्ठे माथवो चैव विप्राणामेव निर्णयः॥ मृताशौचे तथा श्राद्धे मातापित्रोर्मृतेहनि॥ उपवासं च तां-
बूलं दिवारात्रौ विवर्जयेत्॥ पक्षश्राद्धे तथा दर्शे युगमन्वंतरादिषु॥ श्राद्धं निवर्त्य संभुक्त्वा तु तांबूलं
खादयेद्द्विजः॥ मोहाद ह्नत्वा यः श्राद्धं तांबूलं यदि खादयेत्॥ श्राद्धाहं तां भवेल्लक्ता रौरवं नरकं व्रजे-
त्॥ अथ सायं कर्मविधिः॥ रवेरस्तमयात्पूर्वं घटिकैकाय दा भवेत्॥ सायं संध्यामुपास्याथ कु-
र्याद्धोमं च पूर्ववत्॥ अथ दीपविधिः॥ रवेरस्तमयारभ्य यावत्सूर्योदयो भवेत्॥ यस्य तिष्ठेद्गृहे दी-
पस्तस्य नास्ति दरिद्रता॥ आयुर्दः प्राङ्मुखो दीपो धनं दस्यादुदङ्मुखः॥ प्रत्यङ्मुखो दुःखदोसौ हा-
निदो दक्षिणामुखः॥ स्थापितो यदि चैव स्युर्दिक्षु दीपचतुष्टयं॥ शुभेदास्तेस दा सर्वेन दोषस्तत्र वि-
चन॥ इति धर्मप्रवृत्तौ नित्यकर्मः समाप्तः॥ अथ शयनविधिः॥ स्वगृहे प्राक्छिरः कुर्यात्श्वसुरे द-

39

ष्णिणामुखः प्रसङ्गुखः प्रवासे च न कदापि दुष्टङ्गुखः॥ तृणे देवालये चैव पाषाणे चैव पल्लवे॥ अंगणे
द्वारदेशे तु मध्यभागे गृहस्य च॥ रिक्ता भूमौ तथा लोष्टपार्श्वे चोच्छिष्टसंन्निधौ॥ शून्यालये श्मशा
ने च वृक्षमूले च तुष्पथे॥ माता वा भगिनि वा भगिनि वा पोतथा चान्यास्त्रियोपि वा॥ एतेषां संन्निधौ
चैव न स्वापे द्वाह्मणः क्वचित्॥ चंदनं चानुलिप्तांमं धृत्वा पुष्पाणि दंपति॥ तांबूलं चर्वणं कृत्वा
प्रदोपे मैथुनं चरेत्॥ दीपेनष्टे तु यः संगे करोतु मनुजो यदि॥ यावत्वं चदरिद्रत्वं लभते नात्र संश
यः॥ पादालग्ना न नुश्चैव तथा छिष्टं ताडणं तथा॥ कोपं रोषं च निर्भर्त्स्यं संयोगे च न दोषभाक्॥ अ
त्र कश्चिद्विशेषो लिख्यते॥ ग्रंथांतरे॥ ऋतु मध्ये तु भार्यायात त्र संगादिकं चरेत्॥ अनर्तु मत्या
भार्यायां न संगमिनि केन च॥ गर्भाधानां गतं यत्कर्म कुर्याद्दिवैव हि॥ रात्रौ कुर्याद्विधानेन गर्भबी
जस्पर्शेपणं॥ मुत्रादिकं ततः कुर्यायोनिं प्रक्षालये ज्जलैः॥ पूर्वे रात्रे व्यतीते तु संगच्छेद्रतिमंदिरं पा

दीप्रक्षौलयन्पूर्वंपश्चाच्छय्यांसमाचरेत्॥मृदुशय्यांस्थितेशेतेरिक्तशय्यांपरित्यजेत्॥कुपान
हौवेणुदंडंमंबुपात्रांतथैवच॥तांबूलादिनिसर्वाणिसमीपस्थापयेद्गृहे॥कुंकुमंचांजनंचैवेत
थाहारीतसिंदुरं॥धौतवस्त्रंचतांबुलंसंयोगेचशुभावहं॥भर्तुपादौनमस्कृत्यपश्चाच्छय्यांसमा
विशेत्॥सानारीसुखमाप्नोतिनभवेदुःखभागोनि॥स्वपेत्स्त्रिप्राक्शिरःकृत्वाप्रसव्यपादौप्र
सारयेत्॥तांबूलंचवर्वलंकुर्यात्सकामोभार्ययासह॥तांबूलेनमुखंपर्णेकंकुमादिसमन्वितं॥
प्रीतिप्रल्हादसंयुक्तंकृत्वायोगंसमाचरेत्॥विनातांबूलवदनंनग्नामाक्रांतरोदनं॥दुर्मुखाचक्षु
धायुक्तांसंयोगेचपरित्यजेत्॥भुक्त्वानुपतिष्ठस्तुशय्याय्यामभिसंमुखः॥संस्मृत्यसारमात्मा
नपत्न्यांजंघाप्रसारयेत्॥अलोमशांचसुदृढांमनार्द्रंवस्त्रमनोहरां॥योनिस्पृष्ट्वाजपेत्सूर्येवि
ष्णुर्योनिप्रजापते॥योनिपश्योजपेन्मंत्रावस्तुनिनेपुनास्त्विति॥मार्ष्टशास्त्रभवेत्सुत्राद्दनिमत्वास्म

रेद्गूरिं॥ओष्ठाविवर्जयेद्दर्गमन्योमन्यमवलोकयेत्॥स्तनौधृत्वातुपाणिभ्यांमन्योन्यंचुंवयेन्मुखं ब
लंदेहितिमंत्रेणयोन्यांत्रिश्नंप्रवेशयेत्॥योनेस्तु किंचिदधिकोभगेहिंगोबलान्विताः॥मनुः॥स
तुष्टोभार्यया भर्त्ता भार्त्ताभार्यांतथैवच॥यस्मिन्नेतत्कुलेनित्यंकल्याणंतत्रवैध्रुवं॥संभोगेत
स्यभार्यायाः सुदृढास्थिरवीर्यवान्॥स्कंधौवाथकटिंधृत्वायथेष्टंमैथुनंचरेत्॥इच्छापूर्वंभ
वेद्यावदुभयोःकामुयुक्तयोः॥रेतःसिंचततोयोन्यांतस्माद्गर्भस्त्विर्भर्त्तिसा॥ऋतुकालोपग
मोतुप्राप्नोतिपरमांगतिं॥सकुलःप्रभवःपुत्रपितॄणांस्वर्गदोभवेत्॥ऋतुस्नातांतुयोभार्यां
संन्निधौनोपगच्छति॥घोरायांब्रह्महत्यायांपितृभिःसहमज्जति॥ऋतुस्नातातुयोनारि प
तिंनैवोपविंदति॥शुनीवृकीषुगालिस्याछूकरीचपुनःपुनः॥कामयन्त्ता पतिंप्राहुगर्हेणा
मेवसवेदा॥अनेनलभतेपुत्रंसंसारार्णवनारकं॥उभावपिशुचिस्यातांदंपतीमैथुनेगतो॥

घ्रायनादुच्छित्वा नारो ह्यशुचिस्यादशुचिः पुमान्॥ ऋतौ तु गर्भशंकित्वात्स्नानं मैथुनेन स्मृतं॥ अं
नृतौ तु यदा गच्छेच्छौचं मुत्रपुरीषवत्॥ इति धर्मप्रवृत्तौ गर्भाधानप्रसंगोक्तः कथितं॥ अथ पुंसवना
द्यः॥ क्रियाः अपि कथ्यन्ते॥ तत्रेदं गृ.सूत्रं॥ उपनिषदो गर्भलंभनं पुंसवनमनवलोभनं च पदि
नाधोया॥ ततो येगर्भमासे इति॥ ॥ तथा च कारिकायां॥ ततोयगर्भसंस्कारं मासे पुंसवने भवेत्
आद्यगर्भो न विज्ञातस्ततो ये मासि वै यदि॥ चतुर्थे गर्भमासे सीमंतोन्नयनं षष्ठाष्टमे वेति सूत्रं॥
कारिका॥ चतुर्थे गर्भमासे तु सीमंतोन्नयनं भवेत्॥ पूर्वस्यासंभवे षष्ठे मासे यद्वाष्टमे भवेत्॥ त
था च स्मृतिः॥ अधानादष्टमे मासे सीमंतोनयनं भवेत्॥ नवमे मासि वा कुर्याद्यावद्गर्भवि
मोचनप्रयोगपारिजाते॥ सीमंतोन्नयनस्योक्तं तिथिवासरराशिषु॥ पुंसवनं कारयेद्विद्वा
न्सहैवैकदिने यवा॥ अन्नप्राशननाः सर्वा गर्भाधानादिकाः क्रियाः॥ उक्तकाले भवे येनो दोषा

(५१)

ध०मं०
४३

नाषाढपुष्ययोः॥ मासत्रयुक्तकार्येषुमूढत्वंगुरुशुक्रयोः॥ नदोषकृतदामासौलक्षणाबलवा
निति॥ पूर्वस्मिन्दिवसेपलोहविष्टेकाग्रनाभचेत्॥ वृद्धिश्राद्धंपतिःकुर्याद्दूल्लचारिभवेत्तदा॥ त
थाचस्मर्यते॥ पुंसवनेचसोमंनेनतथाचौलोपनायने॥ गोदानेस्नानकुद्वाहेनांदीश्राद्धंपुरोदि
नि॥ अथगर्भिणोधर्मः॥ भूम्याचैवोच्चनोचायांमारोहणावरोहणे॥ नदीप्रतरणंचैवशकटारो
हणंतथा॥ उग्रौषधंतथाक्षारंमैथुनंभारवाहनं॥ कृतोपुंसवनेचैवगर्भिणोपरिवर्जयेत्॥ अ
थगर्भिणोपतिधर्म॥ पुंसोभार्यागर्भिणोयस्यचासौस्तनोश्चौलंक्षौरंकर्मात्मनश्च॥ मृतहारंभस्त
भसंस्थापनंचवाधौस्नानंदुरयात्रांनकुर्यात्॥ वाहनंदहनैचैववपनंसिंदुदर्शनं॥ पर्वता
रोहणंचैवनकुर्याद्गर्भिणोपतिः॥ मासात्तुपंचमादुर्ध्वंनिंदितावहुदोषकृत॥ पंचमासात्
गसात्प्याः कुर्वेत्तुमस्कमेवहि॥ दक्षः॥ ऋतुहृदयव्यतीतेनुनकुर्यान्मौंजिबंधनं॥ अग्न्याधानं

राम
४३

गयाश्राद्धं वपनं तु विवर्जयेत् गर्भिण्यामपि भार्यायां सूनोश्चौलं न कारयेत्। भिन्नभार्यासुत
स्येह न दोषश्चौलकर्मणि॥ यस्यान्या गर्भिणी भार्या सूनोश्चौलं न कारयेत् भिन्नभार्यासु
तस्येह न दोषश्चौलकर्मणि॥ सूनोर्मातरि गर्भिण्यां चूडाकर्म च नस्य वै॥ ऊर्ध्वं तु पंचमान्मासा
न्न कुर्यान्मौंजिबंधनं॥ अष्टमासात्परं श्चैवं न कुर्याच्छ्राद्धभोजनं॥ श्मश्रुकर्म तथैश्चैव केचि
दाहुर्मनीषिणः॥ अथ जातकर्म॥ कुमारं जातं पुरान्यैरालंभादिति॥ तथा चाजाते सुतेपि नाकुर्या
नांदीश्राद्धं विधानतः॥ जातकर्म ततः कुर्यादन्यैरालंभनात् पुरा॥ जातः पुत्रस्तवाद्येति श्रुत्वा त
स्मै प्रदापयेत्॥ परितोषकमित्यर्थं भूषणाच्छादनादिकं॥ दिवा श्चापि वा श्चापि तरश्चैव पुत्र
जाते हि जन्मनां॥ आयांति तस्मात्तदहः पुण्ययुज्यं च सर्वदा॥ जाते सुते सुते वगात्यापः श्राद्धं
कुर्याद्विधानतः॥ जातकर्मविधानेन कुर्याद्दानादिकं ततः तत्र दद्यात्सुवर्णं च भूमिगोतुरगान्

र्थानाच्छित्त्रंछागंचमाल्यंचशयनंवासनंगृहं॥यावन्नछिद्यतेनालंतावद्द्यात्स्वशक्तितः॥आ
शौचेपिप्रकर्त्तव्यंगृहलेपियथाविधिः॥आशौचइतिपूर्वाशौचजातकेमृतकेपिवा॥ससपि
जातकर्मप्रकर्तव्यमेवेसपर्थंग॥ऋणत्रयनिवृत्त्यर्थंदद्याज्जातेसुतेपिता॥ब्रह्मसूत्रंधृतंन्ना
लंतेनोवैष्ट्यनिकृंतयेत्॥स्वधृतेब्रह्मसूत्रेणनालंआवेष्ट्यछिद्यादित्यर्थः॥जातसूतकेक
र्तव्यता॥निबंधसारे॥जातादिपंचमेषष्ठेनिशिथेबलिमाहरेत्॥अर्चयेदष्टदिग्पालागोन
वाद्यसशस्त्रैः॥कृत्वाजागरणंदीपैःसूक्तैश्चैश्शांतिपाठकैः॥द्वारेद्वितीयभागेतुपूतलै
स्त्वापिकज्जलैः॥प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा॥त्रिष्वाशौचनकुर्वीतसूतकेपुत्र
जन्मनि॥दद्यात्तुप्रथमेदानंषष्ठेवापंचमेपिवा॥दशमेबलिदानंस्यादन्नदानंतथैवच॥अ
थनामकरणं॥तत्रकारिका॥द्वादश्यांनामकरणंनांदीश्राद्धकृतंभवेत्॥पुंसायुग्माक्षराणो

स्युर्विपरीतानि योषितां॥ ग्रंथांतरे॥ कानिचिद्वचनानि लिख्यंते॥ मनुः॥ नामधेयं दशम्यां तु द्वा
दश्यां वापि कारयेत्॥ पुण्ये नक्षत्रदिवसे मूढत्वे वा गुणान्विते॥ वसिष्ठः॥ द्वादशे षोडशे विंशे द्वा
त्रिंशे दिवसेपि वा॥ नामकर्म द्विजातीनां कर्तव्यं श्रुतिनोदनात्॥ द्वात्रिंशद्दिवसादूर्ध्वं यावत्सं
वत्सरे भवेत्॥ नामकर्म द्विजैः कार्यमिति केचिदुदीरितं॥ यावत्सरं नैव दोषो मूढयोर्गुरुशुक्र
योः॥ मलमासेपि तत्कार्यादुक्तकालेन दोषभाक्॥ अथ पत्नीकुमारोपवेशनं कथ्यते॥ प्रयो
पारिजाते॥ संस्कारः पुरुषो वापि स्त्रिया दक्षिणतो भवेत्॥ संसारकस्तु सर्वत्र निषेद्धुक्तं तदृक्ष
दा॥ तथा च स्मृत्यंतरे॥ जातके नामके चैव त्वन्नप्राशनकर्मणि॥ निष्क्रमणे च चौले च पत्नी
पुत्रस्य दक्षिणे॥ गर्भाधाने पुंसवने सीमंतोन्नयने तथा॥ वधूप्रवेशने चैव पुनःसंधान एव
च॥ पुजने मधुपर्कस्य कन्यादाने तथैव च॥ कर्मस्वेतेषु वै भार्या दक्षिणे तूपवेशयेत्॥ कंन्यापु

त्रविवाहे च गोदाने व्रतबंधने॥ आशीर्वादाभिषेकं च पल्लो तूत्तरदक्षिणो॥ वायोकूपतडागानां प्रतिष्ठ
यामहोत्सवे॥ ब्रह्मादौ शांतिके चैव पल्लो स्याद्दुत्तरे सदा॥ शांतिके पु च सर्वे पु प्रतिष्ठोद्यापनादिषु॥
वामे तु पत्नी वसेत् पल्लो व्याघ्रस्य वचनं यथा अथ निष्क्रमणं॥ चतुर्थे मासि पुण्यर्क्षे मुक्ते निष्क्रमणं भवे
त्॥ स्नातस्वलंकृतं चाभिर्हिते स्वस्त्ययनं शुभं॥ तथा ज्योतिः॥ गृहान्निष्क्रमणं सूनोश्चतुर्थे मासि
कारयेत्॥ ये त्रोक्तक्षमये मासोत्ततिये प्रथमे पि वा अथ पंचममास कर्तव्यता॥ पंचमे मासि
कर्तव्यं त्रिशोश्चैवोपवेशनं संपूज्य सूकरं भुमिं कुमारं श्चोपवेशयेत्॥ श्रोहिश्यामाके गोधू
मामाषमुद्गतिलाया वा॥ एषामुपरि रासिनोन वस्त्रं प्रसार्य च॥ अथान्नप्राशनं॥ षष्टे मास्य
न्नप्राशनं मितिसूत्रं॥ कारिका॥ अथ पुण्येन्हि षष्ठे तु मासेन प्राशनं भवेत्॥ कृत्वाभ्युदयिकं श्रा
द्धं दधिमध्वाज्यसंयुतं॥ तथा च स्मृति॥ षष्ठाष्टदशमे मासो द्वादशे वान्नमाचरेत्॥ अयुग्मे मासि

वेस्त्रोणांमिति कैश्चिदुदोरितं॥ अथ चौलं॥ तृतीये वर्षे चौलं यथाकुलधर्मं वेति सूत्रं॥ का
रिका॥ तृतीये वत्सरे चौलं कुर्वीतास्योत्तरायणे। शुक्लपक्षे शुभे क्षेत्रे तु कृत्वाभ्युदयिकं ततः॥
यथान्वयं तु केषांचिदुपनीत्यासह होष्यते॥ स्वस्त्यादिवाचयेत्पूर्वं वृद्धिपूर्वेषु कर्मसु॥ मनुः॥
चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः॥ प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिनोदनात्॥ तृतीये
प्रथमे वाब्दे पंचमः सप्तमेपि वा॥ चौलकर्म द्विजः कुर्यात्कुलधर्मानुसारतः॥ अथ चौलतो निय
मः॥ मदनपारिजाते॥ नग्नास्नात्वा च भुक्त्वा च वृषभारोहणं तथा॥ त्रिरात्रमशुचित्वात्तु त्रिभि
र्वर्षैर्व्यपोहति॥ भक्ष्याभक्ष्यं तथा पेयं वाच्यावाच्यं तथानृते॥ अस्मिन्कालेन दोषस्यात्स्या
वन्नोपनीयते॥ अनुपेयस्तु यो विप्रो मयमो हास्ति वेयदि॥ तस्य कृच्छ्रं त्रयं तिस्रा(?)भ्यातावाप्य
पवा नथा॥ अथ चूडाकरणनिषेधः॥ चुडाकर्म शिशोर्मातागर्भिणी यदि वा भवेत्॥ गर्भस्य वा

विपत्तिस्याद्दंपत्योर्वात्रिशोरपि॥स्त्रियोर्मातरि गर्भिण्यां न चौलं नोपनायनं॥पंचमासात्स्यादूर्ध्वे
धोवर्षाद्दुर्ध्वेन दुष्यति॥अथ कुमार लक्षणं॥प्रांग नामःकरणाद्बालःप्रागान्नःप्राशनाच्छिशुः
शिशुत्वं न प्राशनाद्यागा चौलं बालक संस्मृतः कुमारकस्तु विज्ञेयाश्चौलादा मौंजि वंधनं॥शि
शोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतं॥रजस्वलादि संस्पर्शे स्नानाच्छुद्धकुमारकैः॥अ
थ कर्मलोपप्रायश्चित्तं॥आरभ्याधानमाचौलात्कालातिचं तु कर्मणः॥आज्यं व्याहृतिभि र्हु
त्वाप्रायश्चित्तं समाचरेत्॥एकैकस्यैकलोपे तु पादकृच्छ्रं समाचरेत् चौलकर्मण्यतिक्रांते
पादकृच्छ्रद्वयं चरेत्॥अथाक्षरस्विकारविधिर्लिख्यते॥द्वितीयजन्मतःपूर्वं क्षराभ्यासस
माचारेत्॥मौंजीबंधनतःपश्चाद्दारंभोविधियते॥पंचमे सप्तमे वाब्दे पूर्वे स्यान्मौंजीबं
धंनं॥तत्रचैवाक्षराभ्यासकर्त्तव्यस्तदगायने॥बृहस्पतिमंतंचैतनत्तदभावे धुनोच्यते॥सो॥

न्यायनेप्रदोषादिचिंतयेद्बुद्धनवंधनान्॥ अथनक्षत्राणि॥ मृगोदिपंचस्वपिभषेमूलेहस्ता
दिकेचत्रितयेत्रिनोषु॥ पूर्वात्रयेचश्रवणत्रयेचविद्यासमारंभमुपैतिसिद्धिं॥ हस्तत्रिके
श्रोत्रत्रिकेपूर्वासुमगपंचके॥ मूलास्वमैत्रपौष्णेपुमुख्यसंस्कारयिष्यते॥ आदित्यादिषुवारे
षुविद्यारंभफलक्रमात्॥ आयुर्जाड्यंमतिर्मेधासुधोप्रज्ञातनुक्षयः अनाध्यायाप्रदोषाश्च
षष्टिरिक्तास्तथैवच॥ वर्जनीयाःप्रयत्नेनविद्यारंभेषुसर्वदा॥ विद्यारंभेशुभाप्रोक्ताजीवज्ञ
शितवासराः॥ मध्यमौसोमसूर्यौचनिंद्यश्चैवशनिःकुजः॥ उदगयनभास्वतिपंचमेद्वेश्मा
सेक्षरस्वीकरणंत्रिशृंनां॥ स्वरस्वतीविघ्नविनायकंचगुरुंदिनाधीशमपिपुज्यकुर्यात्॥ ए
वंसुनिश्चित्यतेकालेविद्यारंभंतुकारयेत्॥ पुजयित्वाहरिंलक्ष्मींदेवींचैवसरस्वतीं॥ एते
षामेवदेवानांनाम्नातुजुहुयाघृतं॥ प्राङ्मुखोगुरुरासीनःपश्चिमाभिमुखःशिशुः॥ कुर्याद

95

धर्म०
४७

क्षरसंस्कारं पंचमेद्बे शुभेदिने॥ कृत्वा तु मंगलं स्नानं नमस्कृत्येष्टदेवतां॥ संपूजयेद्गणाधीशं
तथा चैव सरस्वतीं॥ नारायणं महालक्ष्मीं गंधधूपादिभिस्ततः॥ एतेषामेव देवानां तत्तन्मंत्रे
णपूजयेत्॥ कृत्वा मंत्रैस्वशाखोक्तं माघारांतं समाचरेत्॥ देवतानां च मंत्रेण नाम्नो वा जु
हुयाद्धृतं॥ एकैकाज्याहुतीं हुत्वा होमशेषं समापयेत्॥ पादिकायां सुवर्णस्य प्रसार्य कुंकु
मादिकं॥ तदभावे थ रौप्यस्य कृत्वा वित्तानुसारतः॥ सुवर्णलेखनीकेन लिखेत्तत्राक्षरा
णि च॥ ॐ नमः शिवायेत्याद्यौ सिद्धिं नामेत्यनुक्रमात्॥ अक्षराणि च संपूज्य स्वयं भुक्त्वा
थवा सयेत्॥ प्राङ्मुखौ सौ समासीनः कुमारस्त्वानि लेखयेत्॥ पूजयित्वा तु गंधाद्यैः पुन
स्तौ वाचयेद्थ॥ आचार्यं पूजयेत्सम्यग्वस्त्रालंकारभूषणैः॥ त्रिःप्रदक्षिणमाहृत्य देव
ताश्चापि वांगुरुं॥ स्वविद्यासूत्रकारांश्च स्वविद्याश्च विशेषतः॥ ब्राह्मणान्पूजयेद्भक्त्यां गंध

एम
४७

पुष्पाक्षतादिभिः तोषयेद्दक्षिणाभिस्तांन्यथाविनानुसारतः॥ अथोपनयनं॥ तत्रेदं गृह्यसू-
त्रं॥ अष्टमेवर्षे ब्राह्मणमुपनयेद्गर्भाष्टमे वेति॥ तथा च मनुः॥ गर्भाष्टमेब्दे कुर्वित ब्राह्मणस्यो-
पनायनं॥ गर्भादेकादशे राज्ञो गर्भेतु द्वादशे विशः॥ ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे॥ राज्ञो
बलार्थिनः षष्ठे वैश्यस्येहार्थिनाष्टमे॥ तथा च याज्ञवल्क्यः॥ आषोडशाद्द्वाविंशाच्च चतुर्विंशा-
च्च वत्सरात्॥ ब्रह्मक्षत्रविशां काले ह्यौपनायनिकः परः॥ अत ऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृ-
ताः॥ सावित्रीपतिता व्रात्या व्रात्यस्तोमादृतेक्रतोः॥ अथोपनयनकर्त्ता॥ आचार्याः॥ पितैवोपनयेत्पुत्रं
तदभावे पितुः पिताः॥ तदभावे पितुर्भ्राता तदभावे तु सोदरः॥ पितापितामहो भ्राता सकुल्या-
गोत्रजो गुरुः॥ उपनीये धिकारेस्यात्पूर्वाभावे परः परः॥ व्रतबंधकुमारस्य विद्यापितुरनुज्ञया
यः करोति द्विजो मोहान्नरकं प्रतिपद्यते॥ दुरस्थः पितृविषयं॥ अध्यायनयाजनं च तथा चैवोप

नापनं॥परिक्ष्यैव तु कर्तव्य अन्यथा दोषभाग्भवेत्॥अविज्ञाने तु गोत्रस्य वह्निगोत्रेण योजयेत्॥अग्न
यो वै मतो विप्रो भवतिश्रुतिचोदनात्॥इतिहारितोक्तेः॥तत्र संस्कार्याः स्मृत्यर्थसारे॥आरसः पुत्रि
कापुत्रः क्षेत्रजो गूढकस्तथा॥कानीनश्च पुनर्भुक्तो दत्तः क्रीतश्च सत्तमः॥दत्तात्मा च सहोढोज
स्त्वपविद्धसुतस्ततः॥एते द्वादश पुत्राश्च संस्कारस्युर्द्विजात्मयः केचिदाहुर्द्विजातौ च संस्कार्यौ
कुंडगोलकौ॥अमृते च मृते पत्यौ जारजौ कुंडगोलकौ॥कलौ दशनिषिद्धास्युदौहित्रं चौरसं
विना॥संस्कारेण भवेत्स्वर्हो इति केचिद्दुदीरितं॥तथा च मनुः॥यएते भिहिताः पुत्राः प्रसंगादन्य
बीजजा॥यस्य वै बीजतो जातो नस्यतेनेतरस्य तु॥अथोपनयने बृहस्पतिर्बलं॥द्विपंच स
समे देहे स्थितो जिवशुभप्रदः॥व्रतबंधे तु पुत्रस्य कन्यायाश्च करग्रहे जन्मचिद्दशमारिस्था
पूजायां शुभदो गुरुः॥चतुर्थोत्यष्टमासश्च द्वादशस्थो जीवो जन्मानमस्कदः॥विवाहमेखला

द्रोनामबलोपिबलप्रदः॥ कर्कमीनधनुस्थोपिबटोश्चेदष्टमोयदि॥ अस्यचोक्तं॥ विनावर्षेनकुर्याद्व्रत
बंधनं॥ वृद्धवसिष्ठः॥ आचार्यस्यबलंश्रेष्ठंबटोरष्टमोयदि॥ नविचार्यबलंतत्रकारयेदुपनाय
न॥ श्लोकः॥ स्कंदवर्षेनबलंगुरुश्चयत्नात्साप्रशस्तंव्रतबंधकर्मः॥ अयुक्तवर्षेसुबलंप्रदोपिनैवैन॥
योरष्टबलोबलोयात्॥ तथाचार्योब्रह्मविशेषमाह॥ मुख्यकालस्त्ववटवान्व्रतगोचरशु
द्धितः॥ कालातिक्रमणेचैवगुरुशुद्धिंनचिंतयेत्॥ अथोपनयनेप्रतिबंधः॥ नांदीश्राद्धेकृतेप
श्चादुल्कापातादिवृष्टिषु॥ सूतकानिनिमित्तेषुनकुर्यान्मौंजिबंधनं॥ अथमातरिरजस्व
लानिर्णयप्रचेतः॥ यस्यामांगलिकंकार्यंतस्यमातारजस्वला॥ तदानमंगलंकार्यंशुद्धौका
र्यंशुभेप्सुभिः॥ प्रारंभात्प्रागविवाहस्यमातायदिरजस्वला॥ तदानतत्सकर्तव्यंमायुःक्षय
करंहितत्॥ ज्योतिःसारे॥ उद्वाहव्रतचूडासुमातायदिरजस्वला॥ निवृत्तिस्तेनाकर्तव्यासद

तंप्रसूतिनोदनात्॥नांदीश्राद्धे कृते पश्चान्माता यदि रजस्वला॥मौंजिबंधं न कुर्वीत गर्गस्य वचनं
यथा॥मातृणां भोजनात्पूर्वं यस्य माता रजस्वला यदि॥तदा कर्म न कुर्वीत यदि कुर्यान्निरर्थकं॥शौ
नकः॥वृद्धिश्राद्धे कृते पश्चाद्वटोर्माता रजस्वला॥तदा कर्म न कुर्वीत यावद्द्रोजनसंगतः॥षट्त्रिं
शन्मते॥मात्रा सहैव भुंजीत ऊर्ध्वं माता रजस्वला॥व्रतबंधप्रशस्तास्यादित्याह भगवान्यमः
नांदीश्राद्धे कृते पश्चात्कन्यामाता रजस्वला॥कन्यादानं पिता कुर्यादिति संगोरसभाषितं॥नांदी
श्राद्धे कृते यस्य भार्या रजस्वला भवेत्॥विवाहे नैव दोषस्याद्दोषस्यान्मौंजिबंधने॥धर्माथ
कुरुते विप्रो मौंजिबंधनमेव च॥न दोषो गर्भरजसोरित्याह स्मृतिसंग्रहः॥अथोपनयनादेतु
मुहूर्तौ भोजनादयः॥मात्रा सहैव भुंजीयाद्विवाहे भार्यया सहैव भुंजीयाश्चौलमानेकभोज
ने॥शिखाहितान्वयलेशान्स्यापितान्कुलधर्मतः॥शेखास्थाने भवत्तत्र मध्येसिरसि वर्तुलं॥प्र

माणंनस्यचैवोक्तं माचार्येणांगुलित्रयं॥ तथाचस्मृतिः॥ समाप्यमात्रासहभोजनंचद्धद्दि नि
दध्याद्धपताभिषेकः॥ अलंकृतिलेग्नपरिग्नहस्यान्मुखंसमिक्षेतपरस्परंच॥ कारिका॥ ब्राह्म
णस्योपनयनमुक्तकालेयदाभवेत्॥ कृत्वाभ्युदयिकंश्राद्धंपूर्वेद्युरपरेहनि॥ कृतस्नानमलंकृ
र्याद्शिषोवाचयेद्था॥ मुक्तंभोज्यसिरसोवपनंस्नानमेवच॥ एवंभूतंकुमारतमवस्थाप्यांति
केततः॥ ज्योतिःशास्त्रविदुक्तेतुमुहूर्तेशोभनेततः॥ दूसादिस्वशास्त्रोक्तविधिनाकर्मकर्तव्य
मिसर्थः॥ अथस्वशाखाविषये॥ वसिष्ठः॥ स्वशाखाविधिमुत्सृज्यत्वन्यस्यविधिमाचरेत्॥ अ
प्रमाणंऋषिंकृत्वासंधतमसिमज्जति॥ स्वकंकर्मपरित्यज्यपदेन्यकुरुतेनरः॥ अज्ञानाद
थवालोभात्सतेनपतितोभवेत्॥ ऋक्शाखोनैवकुर्वीतस्वकोयपरिशाखाया॥ प्रमादाद्यदि
कुर्वीतपुनर्संस्कारमर्हति॥ यत्रनास्तिस्वशाखेचऋक्शाखोक्तसमाचरेत्॥ पुनर्नहस्तोस

(५८)

धo मंo
५०

स्कारमन्यथार्हतिचेत्पुनः॥ यजुःशाखाविधानेन यदि बद्धं च कर्म च॥ कृतं चाविहितं तत्कर्म पुनः कुर्या
द्यथाविधिः॥ अकशाखाविधानात्कर्म यदि स्यादन्यशाखिनां॥ न तत्कर्म पुनः कुर्यादिति यज्ञविदो मतं
अथ अनुप्रवचनं॥ तिष्ठेदहः शेषमस्तमितेब्रह्मौदनमिति सूत्रं॥ कारिका अहः शेषस्ततस्तिष्ठेत्सा
यं संध्यामुपक्रमात्॥ अग्निकार्यं ततः कुर्यादौपनायदिकानलं॥ अनुप्रवचनीयं च तस्मिंन्नेव हुता
शने॥ समन्वारब्ध आचार्यं चर्वोहुतित्रयं हुनेत्॥ उपाकरणपर्यंतं सावित्र्या ब्रह्मयज्ञकं॥ संध्या
माध्यान्हिकीं कुर्याद्धाष्यकारो ब्रवीद्यथा॥ मौंजीबंधानले कुर्यादनुप्रवचनीयकं॥ केचिद्वेवद
न्त्यग्नौ लौकिके चापरे विदुः सायंसंध्यामुपक्रम्य ब्रह्मचारिसमाचरेत्॥ अपरे द्युः कृतस्नानः प्रातः
संध्यामुपासयेत्॥ अग्निकार्यं ततो भिक्षां सायंप्रातश्च पूर्ववत्॥ ब्रह्मयज्ञं हि गायत्र्या मध्यान्हे
तु समापयेत्॥ उपाकरणं॥ संध्या माध्यान्हिकीं कुर्याद्धाष्यकारो ब्रवीद्यथा॥ उपाकरणपर्यंतं स

एम
५०

विद्याब्रह्मयज्ञकं॥ अथब्रह्मचारिनियमः॥ क्षारादिवर्जमश्नीयाद्ब्रह्मचारि दिनत्रयं॥ शायोधश्च
चतुर्थेन्हिमेधाजननमाचरेत्॥ आचार्योवाजपेन्मंसुश्रवःसुश्रवाइति॥ तत्रैवमेखलादिनिविह
स्यान्यानिधारयेत्॥ मेखलमंजिनंदंडंवस्त्रयज्ञोपवितकं॥ पालाशसन्निधौ साज्येन वान्यन्यानि
धारयेत्॥ नियमेनब्रह्मचर्यमब्दं वापिसमाचरेत्॥ अन्यथाधर्महानिःस्यादिनियज्ञविदामतं॥ व
ससोनेस्वगुरवेमेधाजननकर्मणि॥ दद्यान्नावलम्बस्यैवं कौपिनेनप्रवर्त्तते॥ स्मरत्यर्थसारोस
दाधार्यंद्विजैश्लक्ष्णंकौपिनंकटिसूत्रकं॥ कौपोनमहतंधार्यंखंडुवावस्त्रपार्श्वत्सुक॥ कौ
पोनंकटसूत्रंचयतेस्याद्ब्रह्मचारिणः॥ गत्यानैवंगृहस्थस्यश्रौतेस्मार्तेचकर्मणि॥ अथ
महानाम्नोव्रतं॥ रिका॥ महानाम्नादिकुर्वीत्तचनत्कालेव्रतत्रया॥ उक्तेकालेतदाम्पुंनवपना
घुपनोत्तवत्॥ नवामौंजोनवंदंडंदत्वास्विष्टकृनाद्यथा॥ संवत्सरेचरेदेतत्सुर्णान्देतूत्तरायणे॥

अथोपकर्म॥ तत्रेदं गृह्यसूत्रं अथातोऽध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावण्यस्य पंच
म्यां हस्तेन वेति॥ तथा च कारिका॥ अध्यायनामुपाकर्म श्रावण्यां श्रवणेन तु॥ तन्मासहस्तयु
क्तायां पंचम्यां वा तदिष्यते॥ अदृष्टौषधयस्तस्मान्मासे तु न भवंति चेत्॥ तदा भाद्रपदे मासि श्रा
द्ध वणेन करोति नतु॥ श्राकलः॥ मासद्वये ष्युपाकर्म न भवेद्यदि वै तदा आषाढे श्रावणे कुर्याद्ध
स्ते वा कर्कटे रवौ॥ तदभावेप्यन्यस्मिन्॥ मासोऽश्रावणे कुर्यो नो गदयन इति॥ आचार्यः॥ कुर्या
न्न वोपनोतस्य श्रवणेऽध्ययनं नवं॥ तदूर्ध्वं वापि कुर्वीत नैव कुर्यादधः क्वचित्॥ यदि चेद्युदय
व्यापी विघूर्ण्य घटिकाद्वयं॥ तत्कर्मसफलं ज्ञेयमुपाकर्म संज्ञिकं॥ पर्वण्योदयिके कुर्युः॥ श्राव
णी नैतो रोयकः॥ बव्हृचाः श्रवणे कुर्युः यजुः पांसामगा इति॥ धनिष्ठासंयुतं कुर्यात्श्रावणं कर्म
यद्भवेत्॥ तत्कर्मसफलं चास्यादुपाकरणं संज्ञितं॥ संक्रान्तौ ग्रहणे चैव मुंढ योर्गुरु शुक्रयोः॥ ७

पाकर्म न कर्त्तव्यं स्यात्केमनेके पि च ॥ गर्ग ॥ अर्धरात्रादधस्ताच्चेत्संक्रांतिग्रहणं भवेत् ॥ उपाकर्म
न कर्तव्यं परतश्चेन्न दोषभाक् ॥ गुरुभार्गवयोर्मौढ्ये भार्गववार्धिके पि वा ॥ तथाधिमासे संसर्वे
मलमासादिषु द्विजैः ॥ प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत् ॥ प्रस्तारिष्टं तु यत्कर्म क्रियमाणं
न दुष्यति ॥ अथोत्सर्जनं ॥ तथोत्सर्जनं ॥ तथोत्सर्गे षण्मासावनधीयोनेति सूत्रं ॥ कारिका अध्या
योत्सर्जनं माघ्यां पौर्णमास्यां विधीयते ॥ ग्रामाद्बहिर्विदुन्ते स्यादुपलेपादिपूर्ववत् ॥ मनुः ॥ पुष्ये तु
छंदसां कुर्याद्बहिरुत्सर्जनं भवेत् ॥ माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेहनि ॥ उत्सर्जनं भवेत्त
च्चतुर्थे काले तु वैयदि ॥ उपाकरणकाले तु कुर्यादुत्सर्जनं बुधः ॥ कार्ष्णाजिनिः ॥ उपाकर्मणि चोत्स
र्गे गौतमादिश्च सत्यवैः ॥ ऋषिन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः ॥ अनाध्यायाः स्मृतौ सिद्धान्
परित्यज्य त्वधीयते ॥ यस्त्वपूर्वे मधिते मौ प्रारंभे च शुभेहनि ॥ अथानध्यायानाह ॥ पक्षद्वयस्य च

तुर्दश्यां मष्टमो द्वितीये तथा ॥ प्रतोपद्वेदर्शपूर्णो चानध्यायाः प्रकीर्तिताः ॥ चातुर्मास्यद्वितीयासु युग
मन्वंतरादिषु ॥ अष्टकासु च सर्वासु तथा सोपपदादिषु अयनौ विषुवे चैव श्रवणे द्वादशी तथा
शयनी बोधिनी चैव द्वादशोपरि कीर्तिता ॥ द्वितीया प्रेतपक्षस्य साभवे प्रेतसंज्ञका ॥ आश्विनस्य
तु या शुक्ला द्वितीये प्रेतसंज्ञका ॥ भरणी च चतुर्दशी चैव तथा संक्रां चतुर्दशी निर्घाते भूमिचलने
ज्योतिषां चोपमार्जने ॥ एतान कालिकान्विद्यादनध्यायान्मनावपि ॥ चातुर्मास्यां द्वितीयाआ
हुः ॥ शुचऊर्जतपस्येव या द्वितीया विधुक्षये ॥ चातुर्मास्या द्वितीयास्ताः प्रावदंति मंहर्षयः ॥
अथ युगादयः ॥ माघे पंचदशी कृष्णा नभस्ये च त्रयोदशी ॥ तृतीया माधवे शुक्ला नवम्यूर्जे यु
गोदयः ॥ अथ मन्वादयः ॥ आश्वयुक्शुक्ल नवमी द्वादशी कार्तिके सिता ॥ तृतीया चैत्रमास्य
सोता भाद्रपदस्य च ॥ श्रावणस्याष्टमी कृष्णा पौषस्यैकादशी सिता ॥ सिता षाढस्य दशमी मा

घमासस्यसस्यमो॥ श्रावणेचाप्यमावास्याजेष्ठापंचदशोसिता॥ आषाढोकार्तिकिमाघोचैत्री
मन्वादयस्स्मृताः॥ अथाष्टकाः॥ मार्गेपौषेथामाघेनभस्येफाल्गुनेतथा कृष्णपक्षेष्टकातिस्रः
सप्तम्यादेयथाक्रमं॥ अथसोमपदाः॥ ज्येष्ठशुक्लद्वितीयायांचत्वाश्विनिदशमीसिता॥ चतुर्थी
द्वादशीमाघेएतासोमपदास्मृताः॥ मृगकर्कटसंक्रान्तिद्वेतूदग्दक्षिणायने॥ अथचैवतुलामेषौवि
षुवौतौप्रकीर्तितौ॥ चतुर्दश्यांयदापर्वप्रागस्तादृश्यतेरवेः॥ अनध्यायंप्रकुर्वीत्तत्रयोदश्यांतु
सर्वदा॥ असायंप्रात्तरारम्यत्रयोदश्येनुवर्त्तते॥ अनध्यायोभवेत्तत्रभूतेदर्शेभर्वेद्यदि॥ वेदव
द्धिसमाख्यातौसैवसंख्याचतुर्दशी॥ अनाध्यायेष्वधीनांचदेवेंद्रप्रहरेध्रुवं॥ हंतारंडोनंचंद्रो
हान्मनास्वर्गेनयांतिहि॥ ननुरोधस्त्वनध्यायेहोममंत्रेषुचैवहि॥ वेदोपाकरणेचैवस्वाध्यायेचै
वनित्यके॥ अथात्रप्रदोषः॥ षष्टीचद्वादशीचस्यादर्धरात्रादधोयदि॥ नवनाड्यास्त्रुतोयोचे॥

प्रदोषो मुनिभिः स्मृताः युगषट्त्रयोदश्योर्वर्तते स्तमयो यदि॥प्रदोषं तत्र कुर्वीत द्वे काद्ध घटिकासु
च॥युगश्चतुर्थी स स्तमो॥अथ गोदानं॥गोदानं स्नातकश्चैव समावर्तनकं तथा॥चौलोपनयने चै
वन कुर्याद्दक्षिणायने॥मरीचिः॥गोदानमहृतस्येह विवाहश्चैव स्फपस्थित्तेः॥याम्यां न येपि कुर्वी
त गोदानं स्नातकं च वैः॥चकारात्समावर्तनकं॥एतेन गोदाने षोडशे वर्षे केशाशान्दे तु श्मश्रुश
द्वान्कारयेदिति सूत्रं॥कारिका॥गोदानं चौलवत्कार्यं षोडशाब्दे तदुच्यते॥अंकोपवशनं ना
स्ति श्मश्रूणां मुंडनं भवेत्॥अथ समावर्तनं॥अथैतान्युपकल्पयीत संमावर्त्यमान इति सू
त्रं॥कारिका॥वेदव्रतानि वा पारं नीत्वा ह्युभयमेन वा व्रतपक्षं च शब्दार्थमारण्याध्ययने कृते
विद्यां ते गुरुमर्थेन कर्मार्थे करवाणो नैः॥यमर्थं महृतं कृत्वा नतो ह्नामवाप्य च॥कुर्वीत स्वयमे
वैतत्समावर्तनसंज्ञकं॥प्राप्योदगयनाद्युक्तमुक्त्या स्वस्त्ययनं स्वयं॥अथ स्नातकः विद्यांते गुरु

मर्थेननिमंत्रियंकृत्वानुज्ञातस्यवास्नानंतस्यैवव्रतानिभवंतिसूत्रं॥कारिका॥अथसिष्यसमा
वृत्तौनामोपांशुगुरोर्वदेत्॥ऊर्ध्वैरूर्ध्वंवदस्यानंमिदमस्येष्ठमाश्रमं॥हेदेवदत्तगार्हस्थ्यंवत्समों
भोरितित्वथा॥यथाचारंकुर्यादेकस्मिन्नपिवादिने॥गोदानादीनिकर्माणिविवाहात्पूर्ववासरेण
कतंत्रेणवाकुर्यादितियत्नविदोविदुः॥अथमधुपर्कादिविवाहः ऋत्विजोकृत्वामधुपर्कमाह॥
रेलातकायोपस्थितायेस्मादिमधुपर्कोभवतोभवतोस्यंतं॥मनुः॥गुरुणांनमतःस्नात्वासमा
हत्तोयथाविधिः॥उद्वहेतद्विजोभार्यांसवर्णालक्षणानितं॥यस्यास्तुनभवेद्भ्राताविज्ञायेत
वापिता॥प्रोप्रयच्छेतताप्राज्ञःपुत्रिकाधर्मशंकया॥समानप्रवरकन्यासपिंडाचैवगोत्रजा॥
नैवतांवरयेत्प्राज्ञोभार्यात्वेवसूरिकोर्तिता॥वाग्दानंचप्रदानंचवरणंपाणिपीडनं॥सप्तपदी॥
तिपंचागोमुनिभिःपरिकिर्तिताःतत्रवाग्दानं॥कुर्याद्विवाहिकेमासिवाग्दानंद्विजसत्तमः॥कल

श्रेन समायुक्तं संपुज्या गणनायकं ॥ संन्निधौ द्विजदेवानां कर्मणा धर्मसुनाय वै ॥ तयास्वोक्तोयता म
द्यसुरूपा दीयन्ते मया ॥ कायेन मनसा वाचा संप्रीति धर्मवृद्धये ॥ पुत्रमोत्रसुत्ह द्वर्गो समर्वैते न
निश्चीतं ॥ कंन्या तेमम पुत्राय स्वीकृतैव मयाद्य वैः ॥ एतेषां संनिधावेव मम वंशाभिवृद्धये ॥ संबंधं
गोत्रमुच्चार्य दद्याद्वै कन्यकापिता ॥ हस्ते पितुर्वरस्याथ तांबूलं साक्षतं फलं दास्ये हं त्वेद्य पुत्रा
यसुरूपा मम कन्यका ॥ आसाद्य विवाहार्थे द्रव्यमंगलकानि च ॥ स्वीकृता मम पुत्राय मया
द्यतव पुत्रिका ॥ सफलं चाक्षतं दद्याद्यथाचार परस्परं ॥ अथ प्रदानं ॥ कन्यायावरणात्पु
र्वं प्रदानं चैव कारयेत् ॥ संपूज्य कन्यकां दद्याद्वस्त्रालंकारभुषणं ॥ प्रदानेपद कुलादि क
र्मकंठादि भूषणं ॥ लब्ध्वात्रिष्वाथ विप्रेभ्यस्तेभ्यो दद्यात्फलानि च ॥ प्रार्थयेद्वेद संपन्नां मधुप
र्कं पपूजितः ॥ मदर्थं वृणोध्वं कंन्यामिति दत्वा च दक्षिणां ॥ गोत्रोद्भवस्य गोत्रस्य संबंधस्यामुक

स्य च॥ नप्त्रेपौत्राय त्वमुकाय वराय वै॥ कन्याया अपि गोत्रास्य यथा पूर्वं वदुच्चरेत्॥ जप्त्रोमथ च पौत्रा
च पुत्रीं कन्याय थाविधिः॥ कन्यासमोपमागत ब्राह्मणैः सह वै पिता इत्युक्त्वा भो द्विजा यूयं वृणोध्वं क
न्यकामिमां॥ प्रत्युचुस्ते द्विजाः सर्वे वरत्वेमा वृणोमहे॥ प्रसुमंनेति सुक्तं॥ वै जपेयु ब्राह्मणानतः॥ अ
ष्टौ वाथ च चत्वारो ब्राह्मणा वेदपारगाः कन्यायावरणे चैया ज्याः कर्मविदा हि ये॥ गच्छन् श्रणोति
वाक्यानि पक्षिणाम प्रियाणि च॥ जपेत्कनिक्रदत्सूक्तं देवों वाचमचीं तथा॥ अथ पाणिपोडणं
धर्मे चा अर्थे चा कामे च नातिचरिता त्वया॥ इयं गण्हाति पाणिभ्यां पाणि तिपाणौ पिडनं॥ गण्हा
मि ते सौभगत्वाय हस्तमित्यंगुष्ठमेव गण्होयादित्येके पाणौ पोडनमाह वृत्तिकारः॥ अथ सप्तप
दि॥ अभ्युत्क्रामयतो कन्या वधु सप्तपदानि तु॥ साभ्युत्क्रामये सुवै दक्षिणपादमात्मनः॥ इतिप
संगतः पंचागोपि विवाहो दर्शितः॥ अथ मधुपर्कः॥ द्विरचम्य समासीनाः कर्तोपश्चान्मुखो वरं

प्राङ्मुखं तं समासीनं मधुपर्केण पूजयेत्॥ कुलमग्ने परिक्षितये मातृतः पोतृतश्चेति यथोक्तं पुरस्ताद्बु
द्धिमते कन्यां प्रयच्छेद्बुद्धिरूपुलक्षणोज्ज्ञोलसंपन्नामरोगामुपयच्छेत् सूत्रं॥ कारिकायथोक्ते लक्षणाः क
न्यां मुक्तकाले समुद्वहेत्॥ स्यादाभ्युदयिक श्राद्धं पूर्ववादाद्यवासरे॥ अपरेद्युः कृतस्नानो दत्तवस्त्रो
धरो वरः॥ स्वलंकृतः सितः छत्रयद्दातिर्याति बांधवैः॥ वृतोवर वधूं गत्वा मधुपर्केन पुजितः॥ स्वगृ
ह्योक्तेन विधिना कृत्वा कंन्यां स्वशाखिनां॥ वराथप्रतिग्रहेयास्वशाखोक्तविधानतः॥ देशाचा
रानुधर्मेण विवाहः कार्य एव तु॥ तथा च सूत्रं॥ अथ खलूच्चावचा जनपदधर्मो ग्रामधर्माश्च ता
न्विवाहे प्रतीयादिति॥ अलंकृत्य कंन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः द्रूस्यादिरुदत्तोंहृद ॥
ण्यो हरेत्स राक्षसदूत्यं तमष्टधा विवाहः॥ तथा च मनुः॥ ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासु
रः॥ गांधर्वो राक्षसश्चैव पिशाचश्चाष्टमो धर्मः॥ चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः॥ स

क्षसः क्षत्रियस्यैवमासुरं वैश्यशूद्रयोः॥ आछाद्य चार्हद्रत्वा नु श्रुत शील वने स्वयं॥ आहूय
दानं कंन्याय ब्राह्मो धर्मः प्रकीर्तितः॥ यज्ञे तु वितते सम्यक ऋत्विजे कर्म कुर्वते॥ अलंकृत्य सुताद
नं देवं धर्मं प्रचक्षते॥ एकं गोमिथुनं द्वे वा वरादादाय धर्मतः कंन्यादानविधिवत आर्षो धर्म
स उच्यते॥ सहोभै वरतां धर्ममिति वाचानुभाष्य तु॥ कंन्याप्रदानमभ्यर्च्य प्राजापत्यो विधि
स्मृतः॥ ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः॥ कंन्याप्रदानं यो दद्या दासु धर्म उच्यते॥
इच्छयान्योन्यसंयोगः कंन्यायाश्च वरस्य च॥ गांधर्वस्तु विज्ञेयो मैथुन्यां कामसंभवः॥ हत्वा
छित्वा च भोत्वा च क्रोशंतीं रुदतीं गृहात्॥ प्रसह्य कंन्याहरणं राक्षसा विधिरुच्यते॥ सु॥
प्तामंतां प्रमत्तां वा रहो रात्रोपगच्छति॥ स पापिष्टो विवाहानां पैशाचः प्रथितोष्टमः॥ स तिष्टे॥
स्वाङ्मुखो कन्यां तिष्टन्प्रत्यङ्मुखो वरः॥ मुहूर्ते शोभने काले लं तद्वीयां बरं तयोः स्वक्षतान्सु

मुहूर्ते तु क्षिपेत्तेनां त्रिस्त्रोर्मिथः॥ क्षिपेत्कंन्याक्षता सूर्वे पश्चाच्चैव क्षिपेद्वरः॥ अं च्छ्वेत्यादिभिर्मं
त्रैः क्षिपेयुरक्षताद्विजः॥ आशिषो वा च दत्त्वाथ यथाचारं तथाचरेत्॥ ततोश्वाद ङुरवस्तिष्टे
त्सभार्यः कंन्यं कापिता॥ प्राङ्मुखायस्थितायाथ कंन्याद द्याद्द्वराय वै॥ अद्भिरेव द्विजाग्र्याणां
कंन्यादानं प्रशस्यते॥ इतरेषां तु वर्णानां मितरेतर काम्यया॥ दंपत्योरक्षणार्थं हि बध्नीयात्कं क
णं तयोः॥ करयोरकमेकस्य ग्रथितानां तु दंपतोः॥ अनादेश्रोदक्षिणप्रतिमां यादिति भाष्यकार
रः॥ श्रौनकः॥ द्विगुणेनैव सुत्रेण पंचधा वेष्टनं तयोः॥ ततो प्यधार्द्धं चोर्ध्वाधः प्रकोष्टे बंधनं त
योः॥ तथा च स्मृतिः॥ रक्षार्थे दक्षिणे हस्ते बध्नीयात्कंकणं तयोः॥ वंधनं कन्यकासूर्वे वर पूर्व वि
मोचयेत्॥ सूत्रं चतुर्गुणं कृत्वा दंपत्योर्वेष्टितं च यत्॥ रक्षार्थं कंकणं प्राहुराविकेण समन्वितं॥
विप्रे वा जाते अचांपुंसां वध्नीयाद्दक्षिणे करे॥ अथ वाम करे स्त्रिणां वद्ध्वा मेत स्वेव तु॥ दृस्यनेनके

नचित्कन्यायांमकरेबध्वोयाकश्चिद्देशाचारः॥ देशधर्मानुसारइतिव्यवस्थाज्ञातव्या॥ कंन्यायै
वाससिदत्वा वध्वोयावाससोनयोः बध्वोयामंगलंसूत्रेवं कुमोत्तं सुशोभनं॥ इत्यादिकं प्रकुर्वीत
देशधर्मानुसारतः॥ ऊर्मौवेदिव्रतेया तां होमस्तत्रविधियते॥ अथवेदिकालक्षणं॥ हस्तोपिताच
तुहस्ता चतुरस्रासमंततः॥ स्तंभैश्चतुर्भिः सुश्लक्ष्णां विवाहे वेदिकां शुभां॥ विस्तारितां हस्तचतु
ष्टयेन हस्तोच्छ्रितां मंदिर वामभागे॥ स्तंभौश्चतुर्भिः कृत्तनिर्मितां गोवेशविवोहे प्रवदंति संतः॥ अ
न्यःपक्षः॥ कंन्याहस्तैःपंचभिःसप्तभिर्वा कुर्याद्द्वेदीं क्र मष्टष्टस्यितासि॥ रम्येहर्म्येनिर्गमाद्वाम
भागेजायापत्योराशिषस्तंभयुक्तः॥ अथव्रतबधेवेंदिका॥ प्राक्पश्चिमोर्ध्वेषदषष्टयुक्तभि
दोश्चयाम्यानिपदानिपंच॥ एवंविधिज्योतिषरत्ननिर्णयं बटोः शातायुविधस्तुवेदो॥ अन्यःप
क्षः आचार्यस्यपदैःषड्भिरथवाकरैः॥ विस्तृताचतुरस्राचवटोर्वेदिकरोन्नता॥ लंबामितिद्धिह

स्तास्यादुन्नतात्रिंशदंगुले॥प्रत्यग्वेद्याविवाहेचविस्तृताद्वादशांगुला॥अष्टाष्टौचप्रकुर्वीतसोपा
नानथपार्श्वयोः॥तदग्नेकलशाकारंद्वितियन्तुविदंमतं॥अथपीठं॥अष्टत्रिंशांगुलंपीठंकुन्न
तस्यात्षडंगुलं॥अष्टांगुलंचविस्तारंकुर्याद्दीर्घंबरादिनां॥अथहोमः॥होमंदशप्रजेयातांपरिग्र
ह्यकरौमिथः॥आत्मनादक्षिणेपार्श्वेवधुत्तामुपवेशयतु॥विवाहस्यादिनेयास्मिन्दिवावाय
दिवानिशि॥होमंतत्रैवकुर्वीतयथानुक्रमणेनतु॥होमइतिविवाहहोमइत्यर्थः॥तावद्वि
वाहोनैतस्याद्यावत्सप्तपदीभवेत्॥तस्मात्सप्तपदीकार्याविवाहेमुनिभिःस्मृताः॥इद्धमनुः
एकत्वंसंगताभर्तुःपिंडेगोत्रेचसूतके॥स्वगोत्राद्भ्रश्यतेनारीविवाहात्सप्तमेपदे॥गृहप्रवे
शहोमंतुहोमंवैवाहिकंचहि॥एकतंत्रेणवाकुर्यादेकास्मिन्नलमेपिवा॥स्वावांगेसामंगम
लोलाजाहुत्वोपवेशयेत्तु॥यजुःसप्तपदाद्दूर्ध्वंहोमांस्तेचैवबह्वृचः॥सायमुपासनंकुर्यादस्तं

यातेदिवाकरस्वभार्याविधिनायैवत्तस्मिंल्लवहुत्ताशने॥कारिका॥अथयस्मिन्विवाहाग्निरु
सन्नोहनितस्यतु॥तत्सायंतेनमारभ्यावह्निपरिचरेत्स्वयंरात्रावतोनकालश्चेद्धुसायंतेदुप
क्रमः॥आत्मनोसंभवेसल्लोयुत्रादयतियस्थिति॥अथरात्रिभागः॥रात्रौत्रिभागकुर्वीतद्वौ
भागौपूर्ववासरे॥परस्मिंस्तृतीयोभागोविवाहेसूतकेऋतौः॥मध्येअग्नौविनष्टे॥चतुर्थ
मध्येप्यनलेविलग्नेसंधानमग्नौस्त्वपलौकिकाग्नौःऔपासनास्तुर्वमिथापिनष्टेविवाहहो
मंविधिवच्चकुर्यात्॥विवाहऔपासनात्पूर्वमनलेशांतिमागते॥परिणयादिकंकृत्वाहोमशे
षंसमापयेत्॥अत्रकन्याप्यनुमतोचेत्॥प्रयोगपारिजाते॥विवाहहोमेपक्रांतेकन्यायदिरज
स्वला॥त्रिरात्रंदंपतीस्यातांपृथक्शय्यासनाशने॥चतुर्थेहनिसस्नातोन्तस्मिन्नग्नौयथावि
धिः॥विवाहहोमकुर्यात्कंन्यादानादिकंनथा॥चतुर्थमध्यमेकन्याभवेद्यदिरजस्वला॥त्रिरात्रम

ध०मे
५८

शुचिस्त्वेकाचतुर्थेहनिशुध्यति॥ पुंज्ञानहोमकुर्वीत प्रायश्चित्तं विधीयते॥ श्रियस्यं पूजयेद्दत्या
पुनर्होमंविधीयते॥ अथरात्रौदानं॥ कंन्यादानंनिशियेचदूरायोप्योषितायचा॥ उपोषितासुतां
दद्याद्धस्त्यादिषुचतुर्ष्वपि॥ अन्यःपक्षः॥ कंन्यादानंनिशियेचेद्दिवाभोजनमाचरेत्॥ पुनःस्नात
जपेद्देवीपोताकंन्यांप्रयच्छति॥ भुक्त्वासमुद्वहेत्कंन्यासावित्रीग्रहणेतथा॥ उपोषितःसुतांद
द्यादर्चितायवरायवै॥ गांधर्वासुरयोरेवविधिरेषउदाहृतः॥ अथकंन्यादानः॥ पितापिता म
होभ्रातापितृव्योगोत्रिणोगुरुः॥ मातामहमातुलौवाकंन्यादाबांधवाःक्रमात्॥ पित्रादिदात्र
भावेतुकंन्यांकुर्यात्स्वयंवरं॥ रूस्रोककेचिदाचार्याःप्राहुर्मनोत्तिसंकटे॥ अथान्यज्ञातिख
नेदानं॥ स्वज्ञातिखिचेद्दसेनस्यात्कस्मैदेयानकंन्यकास्वगरस्योस्यविधानेनदद्यानांपरशाखि
ने॥ पूजयेन्मधुपर्केणास्वशाखाविधिमांवरं॥ आकंन्यादानपर्यंतंपिताकुर्यात्स्वशाखतः॥ अ

एम
५८

थदंपतिनियमः॥ तत्रेदं सूत्रं॥ अत ऊर्ध्वमक्षारालवणासिनौ ब्रह्मचार्यवधःशायिनौ स्यातां त्रिरा
त्रं द्वादशरात्रं संवत्सरं वैक ऋषिरिति॥ ततस्मृतिः॥ विवाहो दंपतिस्यातां त्रिरात्रं ब्रह्मचारिणौ अ
लंकृता वधश्चैव सहशय्यासनासनौ॥ कारिका॥ वध्वा सहैव कर्त्तव्यो निवासः श्वशुरालये यो॥
चतुर्थरात्रमंत्रैव केचिदेवं वदंतिहि॥ अथ चतुर्थी॥ उत्थाया पररात्रे तु चतुर्थ्यां कंन्यकापिता
कुर्वीत मंगलस्नानं भार्या चैव हितस्य तु॥ दंपती मंगलस्नानं कृत्वा वस्त्रं च धारयेत् ताभ्यां च
वाससो दद्याद्वैराणो पूजयेदथ॥ चतुर्थीमध्ये ज्ञायेते दोषा यद्यपि वरस्य चेत्॥ दत्तामपि पुनर्द
द्यान्पितान्यस्मै विदुर्वैधः॥ आचार्याः॥ प्रवरैक्यादिदोषास्युः पतिःसंगादधौ यदि॥ दत्तामपि ह
रेद्दद्यादन्यस्मादिति केचन॥ हेमाद्रौः कलौ तु पुनरुद्वाहं वर्जयेदिति गालवः॥ कस्मिंश्चिद्देवकूले
तिन तु सर्वत्र केनचा॥ इति पुनरुद्वाह॥ वरस्य पित्रे मात्रे च दद्याद्वस्त्राणि वैततः॥ वरमातुः करे द

57

याद्वस्त्रपात्रंस्रक्पुजितं॥बलिदानंततःकुर्याच्चतुर्दिक्षुयथाक्रमं॥अनेनबलिनादानप्रीयतामितिदे
वता॥वस्त्रदानमिदंपुण्यंवंशानांवंशवर्द्धनं॥वस्त्रस्यदीयतेदानंमतःशांतिप्रयच्छमे॥अस्मदा
दीनसुहृत्तबंधूनामुत्कापांतिभवेद्ध्रुवं॥मातःपालयभावेनकन्यांत्वंपणवत्सले॥कन्यासं
धिप्यलितास्माभिःस्वगेमेतज्जन्मनः॥दीयतेतैसुतायाघप्रोनयेपार्वतिपतेःकन्यासांपालि
तावाभ्यामतिस्नेहेनपुत्रवत्॥इदानींतवपुत्रायदत्तास्नेहेनपाल्यतां॥इतिचतुर्थीकर्मः॥अ
थवधुप्रवेशः॥तत्रेदंसूत्रं॥प्रयाणकपपघमानेपूषात्वेतोनयतुहस्तगृह्येतियानमारोहये
दिति॥कारिकाविवाहानंतरंगच्छेत्स्वभार्यास्वस्यमंदिरं॥यदिग्रामांतरेतस्यात्तत्रयानेनगम्य
ते॥विवाहमारभ्यवधुप्रवेशोमध्येशुभंषोडशवासरस्यनिषिद्धताराततिथियोगदोषोनत
त्रैवंमुनयोवदंति॥अषोडशाद्दिनादुर्वाक्नचवध्वाप्रवेशने॥तिथिवारनाराणांदोषतत्र

नविद्यते॥यथाचारस्तथैव कार्यः॥विवाहमारभ्यवधूप्रवेशोयुग्मेदिनेषोडशवासरावधेः॥नचास
मानयदिपंचमेहनिश्चास्ततस्तदुर्ध्वंनदिप्रशस्ते॥वधूप्रवेशनं कार्यंसत्यमेपंचमेपिवा॥नवमेच
शुभेवोरेसुलग्नेशशिनोबले॥उद्वाहेचतुरष्टषट्शंदिनेषष्ठंवधूप्रवेशनमासेषुद्विचतुःषड
ष्टदशसुसुपंच आयुःप्रदं॥वर्षेपुद्विचतुष्टमष्टमशुभंपंचाब्देमुख्यःपरैःपूर्वैःपुण्यमनो
रराविभवदावधुप्रवेशोभवेत्॥वधुप्रवेशोनदिवाप्रशस्तोनपप्रवेशोननिशिप्रशस्तः॥दिवाच
रात्रौचगृहंप्रवेशःसंकोर्त्तितस्यात्रिविधःप्रवेशः॥अथदेवकोत्थापनं॥समेचदिवसेकुर्या
द्देवकोत्थापनंबुधैः॥षष्ठंचविषमेनेष्टंत्यक्त्वापंचमसप्तमौ॥प्रतिष्ठादिनमारभ्यषोडशाव्द
मध्यमः॥मंडपोद्वासनंकुर्यादुद्वाहेचव्रतेदश॥व्रतदूतिरुपनयेदश हान्मध्यनदूत्यर्थः॥वि
वाहात्प्रथमेपुष्येत्वाषाढेचाधिमासिके॥नचभर्तृगृहेवासचैत्रेनातगृहेतथा॥वंशदानंवि॥

58

धर्म०
६०

नायस्तु मंडपोद्वासनं यदि ॥ अह्नानां त्रु कृते मूढो दंपत्योः क्षयमाप्नुयात् ॥ स्मृत्यर्थसारे ॥ वरे देशांत
रगते त्रिनत्संप्रतिक्ष्य वैः ॥ कंन्यान्यस्मै प्रदातव्या वाग्दाने तु कृते सति पंचत्वं चेद्वरो गच्छेद्वाग्दाने
यदि वै कृते ॥ कंन्यान्यस्मै प्रदातव्या तया सप्तपदा नयत् ॥ कृते सप्तपदे भर्तुर्वियोगो यदि जायते
न दोषः पुनरन्यस्मै कलौ कंन्यामनीषिभिः ॥ ॥ अथ प्रतिकूलं ॥ स्मृतिचंद्रिकायां कृते वाग्दाने श्वयो
पिस्यान्मृत्युर्मेध्यस्य गोत्रिणां ॥ तदानमंगलं कार्यं नारी वैधव्यदं ध्रुवं ॥ भृगुः ॥ वाग्दानानंतरं यत्र
कुलयोः कस्यचिन्मृतिः ॥ तदोद्वाहो नैव कार्यः स्वपक्षः क्षयदोषतः ॥ वृद्धशौनकः ॥ वरवध्वोः ॥ पि
तामातापितृव्यश्च सहोदराः ॥ एतेषां प्रतिकूलं चेन्महोविघ्नप्रदं ध्रुवं ॥ पितापितामहश्चैव मा
ता चैव पितामही ॥ पितृव्यस्त्रीसुतो भ्राता भगिनी चाविवाहिता ॥ एभिरेव विपन्नैश्च प्रतिकूलं
बुधैः स्मृतं ॥ अन्यैरपि विपन्नैस्तु केचिदूचुर्न तद्भवेत् ॥ मांडव्यः ॥ दंपत्योः पितरौ भ्रातात्कपनोतस्त

राम
६०

सोदरः॥ पितृव्यस्तादृशश्चैव पितामहः पितामही॥ एषामन्यतमः कश्चिन्मृतो भवति मानुषः॥ हृते
वाङ्नौश्चये पुंसां प्रतिकूलं प्रजायते॥ दीर्घरोगादिभूतस्य दुरदेशस्थितस्य च॥ उदासहत्तिनश्चैव द
प्रतिकूले न विद्यते॥ प्रतिकूले न संजाते विवाहं नैव कारयेत्॥ प्रतिकूलेपि केप्याहुः कर्तव्यं शांतिपूर्व
कं॥ प्रतिकूले कालमाह॥ पितुर्मातुश्च पत्न्यां च वर्षमर्धं तनदर्धकं॥ सूतभ्रात्रोः सार्धमासमन्ये
षां मास संमितं॥ तदेके शांतिकं कृत्वा यथोक्तविधिना ततः॥ पुनश्चैवाथ वाग्दानं कृत्वा लग्नं विधि
यते॥ संकटे समनुप्राप्ते याज्ञवल्क्येन योगिना॥ शांतिरुक्ता गणेशस्य पूजां कृत्वा समाचरेत्॥ श्रि
यं विष्णुं तथा गौरीं मृत्युंजयं ततः परं॥ एतांश्च प्रार्थयेद्भक्त्या तन्मंत्रेणैव क्रमात्॥ सहस्रमयु
तं वापि ब्राह्मणैः कारितं जपं॥ एतेषां प्रतिमापूज्या आदित्यादिग्रहास्ततः॥ शांत्युक्तविधिना कुर्या
त्कलशस्थापनादिकं॥ समिद्भिश्चरुणा चैव होमं कार्यो यथाविधिः॥ ततो व्याहृतिभिर्होमं शांतमस्तो

(59)

न्तरं हुनेत्॥ ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत्॥ कलशस्योदकेनैव सिंचेयदुंपतोचताः॥
आचार्यं पूजयेद्गन्धयावस्त्रालंकारभूषणैः॥ ऋत्विक्कुंभोदक्षिणां दद्या ब्राह्मणान्भोजयेदथ
प्रतिकूलविधिः प्रोक्तः दृष्टेवं पूर्वसूरिभिः॥ अकृत्वा शांतिकं यस्तु निषेधसति दारुणे॥ यः करोति
शुभं वर्गो विघ्नं तस्य पदे पदे॥ ॥अथ पितरी मृते शुभकर्मनिषेधः॥ मृते जनन्या जनके वेर्षवर्षार्द्ध
मेव च॥ न कुर्याच्छुभकर्माणि कुलधर्मास्तथैव च॥ पितुरब्दम शौचं॥ षण्मासं मातुरेव तु॥ मासत्र
यं तु भार्यायां तदर्द्धं भ्रातृपुत्रयोः॥ अन्येषां तु सपिंडानां मासमेकमदाहृतं॥ उक्तकालावधि
यावत्तावन्नैव शुभक्रिया॥ दशाहानंतरं प्रोक्तं मा शौच यदि जन्मनां॥ शुभार्थे न वजानीयात्कृ
तेपिहि सपिंडणे॥ यावदाशौचमारभ्य सपिंडिकरणं भवेत्॥ विवाहादिनि सर्वाणि शुभकर्माणि
वर्जयेत्॥ मृते पितरि यस्याथ मृतायां वापि मातरि॥ न कुर्याच्छुभकर्माणि वर्षं वर्षार्द्धमेव च॥ व्रतबं

धं विवाहं च न कुर्याच्छोभनं सुतः॥ वर्षं वर्षार्द्धकं चैव वहन्तेपि हि सपिंडने॥ विवाहादि प्रकुर्वीत यदा मह
ति संकटे सपिंडिकरणं दूर्ध्वं मासिकान्यायकर्षयेच॥ कन्यायाश्चातिकालश्चेद्दूरस्यापि भवेद्य
दि॥ तस्योद्वाहो न दोषोस्ति तथा चैवोपनायने॥ शुभकर्माणि कार्याणि निर्हृते स्तेसूतके हि तु॥ दूत्सृ
ज्ये तत्स्यपोंडानां केचिन्मशांति मानवः॥ व्याघ्रः॥ प्रेतक्रियामनिर्हृत्य न कुर्याच्छोभनक्रिया॥ विधिभे
वेत्सपोंडानां नापरेषामयं विधिः॥ अथ विवाहादिषु सुतकोत्पत्तिः॥ चौले चैवोपनयने विवाहे च
महामखे त्रिषट्दशकविंशत्या प्रारंभो नास्ति सुतकं॥ तथा च॥ एकविंशत्यहर्यज्ञे विवाहे द
शवासरान्॥ त्रिषट्चौलोपनयने नांदिश्राद्धं पुरोदिने॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः॥
नांदीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया॥ व्रतयज्ञविवाहेषु श्राद्धे होमे र्चने जपे प्रारब्धसू
तकं न स्यादनारब्धे तु सूतकं॥ प्रारब्धादूर्ध्वमाशौचं विवाहकार्य एव तु॥ व्रतादौ पुजने चैव प्रा

रं भेनास्ति सूतकं ॥ वृद्धशौनकः ॥ ऋत्विजादि क्षिप्तानां चयत्नियं कर्म कुर्वत ॥ कर्मणि क्रियमाणे तु म
ध्ये चेत्सूतकं भवेत् ॥ यावत्कर्मसमाप्तिस्यान्नावन्नाभेति सूतकं ॥ विना नैत्यकमन्येषु कर्मस्था ॥
शौचनिष्यते ॥ विश्वरूपे ॥ विवाहादिषु मध्ये चेत्सूतके सति चांतरा ॥ पूर्वसंकल्पितं द्रव्यं दीयमा
नं न दुष्यति ॥ विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके ॥ शेषमन्नं परैर्देयं दातृन्भोक्तृश्च न स्पृशे
त् ॥ सूतके पितृत्याणि ॥ विवाहे नियमानायगर्वाः ॥ नांदीश्राद्धकृते चैव यावन्मातृविसर्जनं ॥
दर्शश्राद्धं क्षयश्राद्धं स्नानं शौतोदकेन च ॥ अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च ॥ ब्रह्मय
ज्ञं चाध्ययनं नदीसीमातिपातनं ॥ उपवासव्रतं चैव श्राद्धभोजनमेव च ॥ नैव कुर्युः सपिंडाश्च
मंडपोद्वासनाविधिः ॥ मंडपोद्वासनात्पूर्वं नांदीश्राद्धकृते यदि ॥ ये कुर्वंति नरो मोहादयमस्कं व्र
जंति ते ॥ नांदीश्राद्धकृते चैव पित्रोः श्राद्धकृतेपि वा ॥ महादुपवसेद्यस्तु नरकं प्रतिपद्यते ॥ पित्रोः प्र

साब्दिके प्राप्ते नांदीश्राद्धं न कारयेत्॥ यदि मोहाद्द्विजः कुर्यान्मांगल्यं आभुमं भवेत्॥ निवर्त्तयति मां
गल्यं स्वाधायं मंदबुध्यः॥ मांगल्यविपुरवर्षश्वदपमरस्कव्रजंति ते॥ मुहुर्त्तेन लभेदन्यत्कथं चैवा
हिकं न दासमाप्यांब्दिकमभ्यज्य कृत्वाभ्युदयिकं ततः॥ देशकालभयाद्वापि समाहित्तमनो भवे
त्॥ वैवाहिकं सर्वं कुर्यात् संकटं मुनयो विदुः॥ सपिंडा नैव कुर्विंत्तन्नैकग्रामे गृहेपि वा॥ नैव देषां
त्तरे दोषः स्वाहाकारो भवेत् यदि॥ अथ विवाहदूर्ध्वं वर्ज्यानाह॥ स्नानं सचैलं तिलकर्म मिश्रप्रे
तानुयानं करकप्रदानं॥ पिंडस्य निर्वापणमप्यपातं विवर्जयेन्मंगलतो द्रुमेकं॥ मासे षट्कं वि
वाहादि व्रतप्रारंभणे न च॥ जीर्णभांडादिनत्याज्यं गृहसंमार्जनं तथा॥ ऊर्ध्वं विवाहात्सुतस्य त
था च व्रतबंधनात् आत्मनो मुंडनं नैव वर्षं चर्षार्द्धमेव च॥ विवाहोपनयनादूर्ध्वं वर्षं वर्षार्द्धमे
व च॥ विवाहोपनयनादूर्ध्वं वर्षं वर्षार्द्धमेव च॥ न दद्यात्करकान्योडानतिलैरचैयेस्थित्वनू॥ वृद्धि

स्य परिकर्त्तव्यं मातापित्रोर्मृतेऽहनि॥ पिंडनिर्वापणं कार्यं पितृव्यादेरपोड्यं॥ मातापितृणामब्दे तु वि
वाहादिषु सर्वदा॥ तिलपिंडैस्तु कर्त्तव्यमामन्यश्राद्धविवर्जयेत्॥ स्मृत्यर्थसारे महालयेगयाश्रा
द्धे मातापित्रोर्मृतेऽहनि॥ कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सुतः॥ कृद्वौ पिंडान्निमितौ यः क्षये पिंडा
न्करोति यः॥ स एव पितृघाती स्यात्स्वेनेपिंडानपेक्षते॥ स सत्रतः॥ पिंडदानं परि सत्यसंवत्स
कुरुते यदि॥ संततेस्तु विनाशः स्यात्संपदा हरणं भवेत्॥ पौत्रो रेव मतादंतु गयायां च महालये
पिंडनिर्वापणं कुर्यात्कृतोद्वाहोपि यः सुतः अथ कौदरविवाहादि॥ प्रसुद्धाहो मैव कार्यं श्रैक
स्मिन्दुहितुर्द्वयोः॥ न चैक जन्ययोः पुंसोर्विवाहस्त्वेकजनान्यामेकस्मिन्वत्सरे कुले॥ नाशकं
त्से कवर्षे स्याद्देषा विधवा भवेत्॥ एकोदर्युः करनलग्न हणं यदि स्याद्येकोदर्योर्वरयोः कु
लनाशनं च॥ एके त्स्वद्वेतु विधवा भवंति कन्यानघंतरे पिशुभदष्टथुगौलसेधे॥ न मंडणान्मुंड

णमूर्ध्वमिष्टं नपुत्रयोर्मंडणमेकवर्षे॥ नपुनर्विवाहोर्ध्वमप्युत्तत्रयेपिसुतस्यकार्यं दुहितुश्च कु
र्यात्॥ ज्योतिः॥ ऊर्ध्वंविवाहान्ननयस्यनैवकार्योविवाहोदुहितुःसमार्धं॥ अप्राप्यकंन्यास्वश्व
णलयातुवधश्ववेश्मस्यगृहन्नचादौ॥ एकोदरप्रसूतानांमेकस्मिंन्नेववत्सरे॥ नकुर्यान्मंग
लत्रिणोविवाहोचोपनायनं॥ चकारश्च॥ एकोदरप्रसूतानाविवाहंचोपनायनं॥ चौलकर्म
तथाचेतिमंगलत्रयमुच्यते॥ एकस्मिन्मंडपप्येकोनकुर्यान्मंगलत्रयं॥ यदिभिन्नोदराणां॥
स्यात्समाप्यैकेपुनर्भवेत्॥ भिन्नोदराणामेकस्मिन्नकुर्यान्मंडपापोता॥ समाप्यमंगलेचैव
पुनःकुर्याच्चन्यदिकं॥ स्मसयर्थसारेऊद्वात्स्युपुत्रोनपित्ताविदध्यापुत्रंतरस्योद्वहनंकदाचि
त्॥ यावच्चतुर्थोदोनमंगलस्यसमापनंतावदसौविदध्यात्॥ पुत्रोपरिणयादुर्ध्वंयावद्दि
नचतुष्टयं॥ पुत्र्यंतरस्योकुर्वीतनोद्वाहमितिस्मृतयः॥ पुत्रस्याप्युपलक्षणं॥ अथयामेलेज्यो

(८२)

तिः॥ एकस्मिन्वत्सरे चैव वासरे मंडपेपि वा॥ कर्त्तव्यं मंगलं वस्त्रोर्भ्रात्रोर्यमलजातयोः॥ एकत्र लग्ने यदि
पुत्रयुग्मं विवाह चौलं व्रतं बंधकार्यं॥ आचार्ययुग्मं यदि वेदियुग्मं नांदीमुखं चैकपितृश्च नान्ये
अथ संकटे प्रवृत्तिमाह॥ ज्योतिः॥ एकोदर्योर्वरयोरेकदिनोद्वाहव्रतौ भवेन्नाशुभः॥ न घस्रान्तरमेक
वर्षे कथ्याहुः संकटे शुभं॥ न प्रतिषिद्धं नलभेसंप्राप्ते संकटे महति॥ एकोदरस्यां भवयोरेकाहे
मंडपे काले॥ संकटे तथा च स्मृत्यंतरे॥ न चैककन्यायोः पुंसोर्विवाहस्त्वेकवत्सरे॥ अब्दभेदे
शुभं केचिदाहुर्महति संकटे॥ कृत्ते चौलोपनयने भवेद्याचदिनत्रयं॥ कन्यादानं च कर्त्तव्यं
पित्राहुरिति सूरयः॥ व्रतबंधनमेकस्य तथैकस्य विवाहकं॥ एकस्मिन्नपि वान्यस्मिंदि
ने कुर्यात्तु कैपिता॥ मध्ये चेद्व्रतबंधस्य विवाहो यदि वा भवेत्॥ अलोभसूनुर्नस्य कन्या वाथ
सूनस्य वा॥ कन्याविवाहमध्ये चेद्विवाहास्यासुत्तस्य नु॥ पित्रैव तु तदा कुर्यादिति कैश्चिदु

द्विरित्तं॥ रक्षं भवद्य दा तत्र कथं स्यान्मातृपूजनं॥ नांदीश्राद्धं भवेदेकं स्वस्तिवाचनपूर्वकं॥ एक एव हि कर्ता स्याद् अनेकेष्वपि कर्मसु॥ अष्टवर्गो भवेदेकः संकल्पस्तु पृथक् पृथक्॥ गणेशः श्रियं माणानां युगन्मातृषु पूजनं॥ नांदीश्राद्धं भवेदेकं होममंत्राः पृथक् पृथक्॥ मंडपो परि मंडनं॥ संहितासारे॥ स्यां॥ चौलमंडपमेवोक्तं वर्जयेद्धरणा स्यरं॥ ऋतुत्रय पुनर्योवनं कुर्यात्स लुमंडनं॥ प्रवेशे निर्ममोः पश्चान्न कुर्यान्मंगलत्रयं॥ न पुनर्विवाहे धर्म ऋतुत्रयेपि विवाह कार्ये दुहितायां च कुर्यात्॥ न मुंडं नाच्चापि हि मुंडनं च गोत्रैः कर्तायाय दिनाद्धि भेदः॥ कुले ऋतुत्रयादर्वाङ् मंडनोन्नतु मंडनं अब्दभेदे प्रकुर्वीत मुंडना न्मुंडने भवेत्॥ पुत्रोद्वाहान्नैव पुत्रीविवाहस्यान्तु ऋतुत्रये॥ अब्दांतरान्मुंडनं चैनैकदा मुंडनाद्वयं॥ फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने॥ अब्दभेदे न दोषस्यादिस्याचार्यो ब्रवीदथ॥ गर्गः॥ दोषस्यादुर्ध्वमुद्वाहा कुले तेदुपनायने॥ न दोष पुरुषोद्वाहादूर्ध्वं कन्या विवाह

के॥ व्याघ्रः॥ पुत्रोद्वाहोत्सरदोषोदुहितुस्या चैत्रे चैवोपनायनं॥ अब्दमेदाल्पकुर्वीतन्मतुत्रयविलं॥ व
नं॥ अथ परिवित्तादिस्मृत्यर्थसारे॥ दाराग्निहोत्रादोनाचक्रुरुतेयोग्रजेस्थिते॥ परिवेत्तासविज्ञेयःप
रिवित्तस्तुपूर्वजः॥ पितृव्यपुत्रेसापत्नेपरदारसुतादिषु॥ विवाहाधानयज्ञादौ परिवेत्राद्यदूषणं
षंढांधवधिरस्तब्धजडग्वादचपंगुषु॥ कुब्जयमनरोगार्तेष्वकुंगोविकलांगेषु॥ स्तब्धेषु स्त्वेक्षते
चैवश्यनस्यैनिरिंद्रिये॥ मूकोन्मत्तेषु सर्वेषु न दोषः परिवेदने॥ कंन्याविषयेपिप्रयोगपारिजाते
एकमातृकसुतानांपुत्राणांपरिवेदने॥ दोषस्त्वात्सर्ववर्णेषु न दोषोभिन्नमातृषु विवाहोग्धि
कारस्य ज्येष्ठकंन्यास्थितायदा॥ तदनुज्ञाविनाचाधिकनिष्ठामुद्वहेत्तदा॥ कालेप्रतिक्षणंन
स्याद्रजोदुष्टंनदोषभाक्॥ परिवेनाभवेद्यस्तुपतितःकन्यकापिच॥ अथसंस्कृतकन्यायारजा
दोषस्मसंतरे॥ असंस्कृतानुयाकंन्यारजःसाचेत्सरिच्युता॥ भ्रातरःपितरस्तस्याःपतितास्तु

र्नसंशयः॥ तथा चेतिहासे॥ पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता॥ सा कन्या वृषली ज्ञेया तत्पतिर्वृ
षलीपतिः॥ अथ स्त्रीणां रजोदोषः॥ प्रसंगतः कथ्यते॥ रागजं रोगजं चैव द्रव्यजं कालजं तथा॥ स्त्रीणां
चैव रजः प्रोक्तं कालजं दोषकृद्भवेत्॥ यावत्संवाशनाद्वानिपरतो दशवासरान्॥ मासिमासि रज
स्त्रीणां कालजं न प्रचक्ष्यते॥ पंचाशद्वर्षादूर्ध्वं नैव दोषः॥ याज्ञवल्क्यः॥ रजस्रावे तु नारीणां रजो
दोषो दिनत्रयं॥ चतुर्थे दिवसे स्नाता स्पर्शनादेव निर्दिना॥ शुद्धा भवेच्चतुर्थेह्नि स्नानेन स्त्री रजस्व
ला॥ दैवे कर्मणि पित्र्ये च पंचमेहनि शुध्यति॥ स्मृत्यंतरे॥ रजस्वलायाः पुनरेव चेद्रजः प्रान्हस्य
तेष्टादशवासराच्छुचिः॥ अष्टादशाहे यदि चेद्दिच द्वयादेकोनविंशे त्रिदिना ततः परं॥ रजोयुता
ष्टादशवासरे पुनः प्रयेणया यौवनशालिनी वधु॥ त्र्यहेण स्त्रा शुध्यतो दैवपित्र्ययो रजो न
युक्तं शुचिमालवेसनि रजस्वला यदि स्नाता पुनरेव रजस्वला॥ अष्टादशदिनादर्वाक् अशुचि

६५

त्वं न विद्यते॥ ऋतुकाले व्यतीते यु यदो नारी रजस्वला॥ तत्र स्नानेन शुद्धिः स्यादष्टोदशादिनात्परं॥ दिना
र्ध्वे सोडशाद्वी कनारी यावातियौवनं॥ पुनारजस्वलापि स्याच्छुद्धा स्नानेन केनचा॥ रात्रौ कुर्यात्त्रि
भागं तु द्वौ भागौ पूर्ववासरे॥ ऋतौ सुतेमृते चैव तूत्येयं सात्रापरे हनिः॥ अन्यः पक्षः॥ रात्रावेव समुत्पं
न्नेमृतेरजसि सूतके॥ पूर्वमेव दिनेग्राह्यं यावन्नोदयतेरविः॥ रिति केचित्तु देशाचारः॥ न तु सर्वत्र॥
अथ द्वितीयविवाहनिमित्तं॥ स्मृत्यर्थसारे॥ अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत्॥ मृतप्र
जां पंचदशे सद्यस्त्वप्रियवादिनि॥ स्मृत्यंतरे व्याधिता स्त्रीप्रजा वंध्यान्युन्मत्ताविगतार्तवा॥ अदु
ष्टा लभते त्यागं तीर्थतो न तु धर्मतः॥ अग्निस्त्रीष्टादिशुश्रूषां बहुभार्यः सवर्णया॥ कारयेत्तद्बहु
त्वं च ज्येष्ठया गर्हिता न चेत्॥ सुरूपां सुप्रजां चैव सुभगामात्मनः प्रियं॥ धर्मानुचारिणीं भार्यां
न त्यजेद्द्विजसत्तमः॥ अग्निसंयोगतः॥ जीवत्या ज्येष्ठपत्न्या च वक्ष्यं स्त्री पुनरुद्वहेत्॥ कृत्वा मंगल

स्त्रांतंमधुपर्कादिपूर्ववत्॥सर्वेकनिष्टभार्यायाःहवनंतत्रचैवहि॥कनिष्टभार्यासर्वैवैचाहिकंह
वनंचज्येष्टभार्याग्नौकुर्यादित्यर्थः॥विधिवज्ज्येष्टभार्याग्नौकुर्याद्वैवाहिकंचयत्न्॥तदभावेतुलौका
ग्नौसर्ववैवासहिकंभवेत्॥वक्ष्येहमग्निसंयोगपत्न्येज्येष्ठकनिष्टयोः॥निदध्याज्येष्टभार्याग्निस्थ
डिलेदक्षिणेनच॥तंतुरेककनिष्टाग्निस्थंडिलेतन्निधायच॥पृथकस्थंडिलयोरग्निसमाधाय
यथाविधिः॥तत्रकृत्वाज्यंभागांतंमन्वाधानादिकंततः॥जुहुयाज्येष्टभार्याग्नौसमन्वारब्धआहु
तो॥अग्निमिलइतित्वग्निर्नेवमिश्चयथाक्रमं॥ततःस्विष्टकृतेहुत्वाहोमशेषंसमापयेत्॥समि
ध्यैनसमोरोप्यत्वयंतेयोनिरित्यृचा॥प्रत्यवरोहत्यनयाकनिष्टाग्नेधियानं॥आज्यभागांतमंत्रा
दिकृत्वारभ्यंतदादितः॥ॐ अग्नावग्निश्चरतिप्रविष्टऋषीणांपुत्रोअधिवाजएषः॥तस्मैजुहोति
हविषाघृतेनमादेवानामोमुहद्भागधेयं॥समन्वारब्धएनाभ्यांपत्न्याजुहुयाघृतंअग्निनाग्नि

65

श्चाग्नावग्निस्त्वं त्वयाग्ने अग्निनेति च॥पाहि नो अग्न एकया इति समिध्वन्त तःपरं॥अस्तोदमधिमंथनमभि
श्चतसमिःपरं॥ततस्विष्टकृत्तं हुत्वा होमशेषं समापयेत्॥तत्रैवोपासनं कुर्यात्सायमाभियथाक्र
मं॥अथ औपासनाग्नौ संयोगः॥संयोगो जायते चाग्नेरग्नेस्त्वौपासनस्य तु॥निरुध्यात्तं विभज्या॥
ग्नि पूर्वपश्चिमयोर्द्विशोः॥आद्यस्तु पूर्वभागाग्नौ प्रायश्चित्ताहुतिर्हुनेत्॥चेत्स्याहि वेधद्त्वाधात्व
देवानामपोस्यर्थः॥द्वितीयः पश्चिमस्याग्नावाहुतोद्वेहुनेदथ॥स्वर्णवस्योरेकवर्णे अत्रे दग्नि
अधायथा॥यथा नरो स्येलन्तत्वा त्वामग्ने मानुषीरिति॥ग्रहदाहाग्निसंसर्गो गृत्याग्ने जायतेत
था॥कृत्वाचाघारपर्यंतक्षमायाज्याहुतिर्हुनेत्॥ग्रामदाहाग्निसंसर्गो गृत्याग्नौ जायतेतथा
कृत्वाचाघारपर्यंतक्षमायाज्याहुतिद्वयं॥अग्निकार्ये कृते चेत्समाग्रत्याग्नौ ब्रह्मचारिणा॥प्राय
श्चित्तं गृहो कुर्यात्तस्मिन्नेव हुताशने॥पाहि नो अग्न इत्येकापत्रवेश्यावनस्यते॥अनाज्ञातं य

द्वेस्येकाज्जुहुयादाहुतित्रयम्॥ अथोपासनानोत्नप्रायश्चित्तं॥ कारिका॥ नित्यहोमेत्वतिक्रांते सं
स्कृताज्यंचपूर्ववत्॥ स्वतुःकृत्वाग्रहोत्वाज्यंमन्नस्यंस्याजुहेत्यथ॥ अर्द्धं कृत्रिरात्राज्जुहुयादया
श्चदासत्यरोत्रातुमनस्वतोच॥ एकादशाहेसहतंतुमासांस्याद्वादशाहोश्वधंवमग्निंनाशःास्त
नकांतरितेवन्हौमनोभूर्भुवःस्वरामध्येपवेतिसंप्रास्येपुनःसंधविधियते॥ आद्वादशदिनादेर्वाक
प्रायश्चित्तंकथंभवेत्॥ तत्रकृत्वाज्यभागांतमयाश्चेत्यादिसत्यमं॥ हुत्वास्विष्टकृतादिस्याहोम
शेषंसमापयेत्॥ दिवसाद्वादशादूर्ध्वंकुर्याद्धोमंविवाहवत्॥ गृह्याग्नावेककुर्वित्तप्रायश्चित्ता
निमित्तंजांतदभावेतुकुर्वीतलौकिकाग्नौयथाविधि॥ प्रातर्होमोपवासायंप्रमादान्नकृतो
यदिहुत्वाव्यात्हतिभिश्चाज्यमनोनेष्याहुतिंहुनेत्॥ प्रायश्चित्तविशेषस्ययत्रनोक्तोविधिर्भ
वेत्॥ हुनेदाज्याहुतोस्तत्रभूर्भुवस्वरितिस्मतं॥ पुमरापाधावें॥ स्वोदक्यापतितःशूद्रोरजस्वमुत्रंपु

रोषकं॥स्वश्रोदग्निंसमिपस्थंचेत्पुनराधानमिष्यते॥समिधश्चेत्समनुपन्नाश्चास्याद्गगएवबा॥पुन
राधानवकुर्याकेचिदत्राविदोजनाः॥समिद्धत्वानासुर्वमग्निश्चदुपश्राम्यतिपुनराधानवकुर्याद
याश्चेत्यादिपुर्ववत्॥अथविधुरोपासनं॥त्वाद्दाहुर्वाचापलोकोग्निहोत्रंकथमेवजुहोतिति॥
तथाचस्मृतिः॥मृतायामपिभार्यायांवैदिकंनसजेद्विजः॥उपाधिनापियत्कर्मयावज्जीवंस
मापयेत्॥कल्पेतुकुशमयींपत्नीकृत्वातुगृहमेधिनः॥अग्निहोत्रमपासंतेयावज्जीवमनुव्रत
अथविधिमाह॥उद्धृत्यवन्हिंप्रणवेनचादौप्रसग्निरूपसामितित्स्वचाहरेत्॥विधायपृ
ष्ठोदोविमंत्रकेनचत्तत्स्तहोमस्तिस्त्रभिः॥समिद्भिः॥लेखादयोनैवतत्साविंतुविश्वानिनोध्ये
नद्रूमेचमंत्राः॥आरोपणंचाध्यवरोपणंचस्थापतिरेवंधुरानलस्य॥दत्त्यकृत्वातनोहोमंसा
यंप्रात्तर्यथाविधिः॥प्रतस्येसमिधवापिपाणौवायुगपत्तयेत्॥प्रत्सवरोहणंनैवनचैवारोप

ए०म०
६८

णंतथा ॥ विधुरस्यविधिः केश्चिदुक्तोऽयमिति सूरिभिः ॥ अथ मृतभार्यस्य पुनर्विवाहविषये संग्रहः ॥ प्र
मस्त्रीमृतवत्सरादितपुनरुद्वाहः ॥ विधियदा भवेत् ॥ विषमे परिवत्सरे समवर्षे तु मृतिप्रदो भवेत् प
लोवियोगे प्रथमे च वर्षे त्रिपंचवर्षैस्तु नरेव दूयः ॥ आयुष्यसे तु श्व शुभप्रदं स्याद्विसिष्ठगार्गोत्रिपरा
शराद्याः ॥ भार्यान्तरविवाहस्यादयुग्मेवत्सराः शुभाः ॥ युग्मे भर्त्तुर्विनाशस्याद्गार्ग्यस्य वचनं यथा ॥
आपुत्रोत्पन्न मृतायस्य भार्या न स्य विहृतं ॥ युग्माद्वे युग्ममासे वा कर्त्तव्ये शुभदो मतः ॥ अथ गर्ग्यः ॥
मते जनन्यां जनके गतायां द्वितीयवर्षे प्रकरोति शोभनं ॥ करोति मोहात्स करोति हानिं वदन्ति गार्ग्या
त्रिपराशराद्याः ॥ इति मृतभार्यस्य विधिः ॥ अथार्कविवाहः ॥ अकृत्वार्कविवाहं तु तृतीयां यदि चोद्व
हेत् ॥ विधवा सा भवेत्कन्या तस्मात्कुर्याद्विचक्षणः ॥ अर्कसंनिधामागत्य गुर्वादिसहितः शुचिः ॥ स्व
स्त्यादिमधुपर्कैर्लावरमाचार्यहस्ततः ॥ अर्कस्य पुरतस्तिष्ठेत्प्रार्थयेतद्विजोत्तमः ॥ त्रिलोकवा

सिन्नस्याश्च च्छायया समितो रवेः॥ ततो योद्वाहजं दोषं विचारय सुखं कुरु॥ अविंगैरभिषो च्याथ खे
तवस्त्रेण वेष्टयेत्॥ कार्पासतंतुभिश्चैव गंधपुष्पैः समर्चयेत्॥ गुडौदनं नैवेद्यं तांबूलं च निवेदयेत्
अर्कं प्रदक्षिणा कुर्याज्जपेन्मंत्रमिमं बुधः॥ मम प्रीतिकरा पूर्वं मया सृष्टा पुरातनी॥ अर्क जो ब्रह्म
णा सृष्टः सर्वप्राणिहिताय च॥ वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनो॥ ततो यो ह्वाहिजं पापं
मृत्युं चाशु विनाशय॥ इति संप्रार्थितो विप्रः कन्यावरणमाचारेत्॥ गोत्रं स्वस्यानुसंबंधं मुख्याचार्यो॥
थत्रिपुरुषं॥ आदित्याया थ सवितुरर्कस्य च यथाक्रमं॥ पुत्री पौत्र तथा नप्त्रा गोत्रं काश्यपमिस
थ॥ आचार्यो मुख्यतः कुर्यात् सुमुहूर्तोदिकं च यत्॥ गोत्राया शर्मणे तुभ्यं मया दत्तां समाश्रयः॥ इत्थं
भूत्वा च विधिवद्विद्द्विब्राह्मणैः सह॥ कंकणं चापि बध्नीयाद्धस्ते मंगलसूत्रकं॥ स्वशाखोक्त
विधानेन तन्मंत्रेण कारयेत्॥ गायत्र्या वापि कुर्वीत केचिदेवं वदंति हि॥ निक्षिपेच्च तुरंकुंभान

र्कस्य परितो वरः॥ धूपसिद्धैस्तैनमर्चो वाग्नेयादिचतुष्टये॥ सवस्त्रं प्रतिकुंभं च त्रिसूत्रेणैव वेष्टये
त्॥ हरिद्रागंधसंयुक्तं पूरयेच्छितलं जलं प्रतिकुंभं महाविष्णुमतो देवेति पूजयेत्॥ अर्कं च पूजये
द्भक्त्या गायत्रेण प्रतोन्नचा॥ अर्कस्योत्तरदिग्भागे स्थंडिलं कारयेद्बुधः॥ वरस्तत्रैव चान्येन जुहुया
दाहुतिरथ॥ षडाहुतिस्तु वेणैव सं गोभिरिस्त्वैकया॥ यस्मै त्वं कामकामायै स्यचैकया ततःपरं
व्याहृतिभिश्च जुहुयात्कुर्यात्स्विष्टकृतादिकं॥ अथाचार्याय गां दद्याद्दक्षिणां चैव शक्तितः॥ पुनरर्कं
संपूज्य प्रार्थयेत्तदनंतरं॥ आयुर्देहि यशो देहि प्रजां देहि पशूनपि॥ देहि मे वान्छितं पुष्टिं स्वस्थाने
त्वं स्थिरो भव॥ इत्यर्कविधिः॥ अथ पुण्याहवाचनं॥ द्वात्रिंशदंगुलं द्रोसममतास्त्वतुरंगुलं॥ रेखे द्वे
कोणतः कोणेतिर्यक्कर्वितपार्श्वयोः॥ कुर्यात्तु कारयेत्तत्र द्वात्रिंशत्संख्यया ततः॥ पादवस्त्रा
र्द्वयोतस्य पुरतो गजशुंडवत्॥ पश्चिमे कलशाकारं विर्मितं ब्रह्मणा पुरा॥ तेदेवस्वस्तिकं चेति प्र

वदंतिमहर्षयः॥ तंदुलैः संलिखेद्भूमौ आदौ तु शुभकर्मणि॥ तन्मध्ये स्थापयेद्द्वाभ्यां सजलं कलशद्व
यं॥ सौवर्णं राजतं वापि कांस्यं वा रलपूरितं॥ पात्रे द्वे विन्यसेत्तत्र सौवर्णं राजतेपि वा॥ सफलेकां स्य
पात्रे वान्यसेत्तंदुलपूरितं॥ सुवर्णपत्रयुग्ये श्वपंचरत्नसमन्विते॥ पलोपुत्रैः समायुक्तं शुभार्थैश्रांल
लैः सह॥ पुण्याहवाचनं कुर्यात्सर्वेषु ऋत्विकर्मसु विवाहोषु सर्वेषु गर्भाधानादिकर्मसु॥ नांदीश्रा
द्धं समृद्ध्यर्थस्वस्तिवाचनमारभेत्॥ स्वस्तिवाचनमंत्रष्टं सर्वेषां मृद्धिकर्मणां॥ आदावंते प्रकर्त्तव्ये
मितिपुराविदो मतं॥ अथ षोडश संस्कार कर्मण्याह भाष्यकारः॥ गर्भाधानं पुंसवनं सोमंतो जात
कर्म च॥ नामनिष्क्रमणे चाथ प्राशनं चौलकर्म च॥ तथा पेनयनं चैव महानाम्नी महाव्रते॥ उपनिष
द्व्रगोदानं समावर्तनकं ततः॥ विवाहोत्सर्ष्टकं चेति संस्काराः षोडशैव तु॥ एते वै मुनयः प्रोक्ताः कर्त्तव्या
हि द्विजन्मनां॥ अथ नांदीश्राद्धं समस्यार्थसारे॥ स्वपितृन्यपितादद्यात्कृतसंस्कारकमसु॥ प्यावद्वि

वाहपुत्रस्य तावदेव हि ते सुतः॥ नांदीश्राद्धं पोता कुर्यादाद्येपाणौग्रहे बुधः॥ अत ऊर्ध्वं सुतः कुर्या
त्पितृणां तद्वि दैपितुः॥ नांदीमुखे कर्मणि संप्रवृत्ते पितुर्यथो जीवति तस्य तातस्य॥ येषां च कुर्यात्स पिता
स्वयं च तेषां हि कुर्यादिति शास्त्रसिद्धं॥ यथा जीवत्पितानां दीश्राद्धं कुर्याद्विधानतः॥ पितुर्मातामहा
दीनामेष धर्मः सनातनः॥ मनुश्राद्धं तु मातृपूर्वं स्यात्पितृणां तदनंतरं॥ ततो मातामहानां च वृ
द्धौ श्राद्धे त्रयं स्मृतं॥ एकैकस्मिन्दिने श्राद्धमेकैकं वृद्धिसंज्ञकं॥ शुभार्थी विधिवत्कुर्यादेकास्मि
न्नपि वा दिने॥ हेमाद्रौ॥ नांदीमुखे विवाहे च प्रपितामहपूर्वकं॥ अथ पादप्रक्षालनं॥ अप्रवा
होदकं स्नानं विप्राणामभिषेचनं॥ रवेरभिमुखः कुर्यात्संध्यावंदनकर्म च॥ अत्र विशेषः॥ नां
दीश्राद्धे कृते चैव द्वादश्यामपि सर्वदा॥ विप्राणां क्षालयेत्पादौ प्राङ्मुखस्तूपविश्य च॥ विप्राणा
मुपविष्टानां प्राङ्मुखानां तु सर्वदा॥ विप्राः क्षालयेत्पादौ नग्नश्राद्धे नवश्राद्धे चैव तु पिंडे प्रेतकर्म

सु॥ तिष्ठन्नां पादौ प्रक्षालेयेद्द्विजः॥ अथ विवाहमासानाह॥ माघफाल्गुणवैशाखज्येष्ठमासाः शुभाव
हाः॥ विवाहे मार्गशीर्षे तु देवस्यमतेन तु॥ पौषे तु मकरेस्थे वै चैत्रे मिनगातेरवौः आषाढे मिथुना
दिस्थे कोवार्यो त्करपोटलं॥ मीनराशिस्थिते सूर्ये विंशति वासरे यदि॥ विवाह शुभदश्चैव न
तु मेषे कदाचन॥ यदि रविगते मीने विंशति वासरे यदि॥ न भवति खलु दोषश्चैत्रमासविवाह
का॥ यदि रविगते मेष चैत्रमासविह कः॥ स खलु शुभनाशः सर्वदा वर्जनीयकः॥ मार्गे मासि
तथो ज्येष्ठे विवाहं चोपनायनं॥ ज्येष्ठपुत्रदुहित्रोश्च यत्नेन परिवर्जयेत्॥ जन्मधिष्ण्येन च
जन्ममासि न च जन्मकालेपि च नो विदध्यात्॥ जेष्टेन मासि प्रथमस्य सूनोः तथा सुताया अ
पि मंगलानि॥ तथा ज्योतिःसारे॥ न जन्ममासि न च जन्ममेत्त तथा नेव जन्मदिवसेपि कारयेत्
आद्यगर्भदुहितस्य वा जेष्टमासि न तु आनमंगलं॥ अथ जेष्ठत्रयं॥ ज्येष्टे न जेष्ठयोः कार्यं न्नृपा॥

योपाणो पोडनं॥ नयोरेकन्तरे ज्येष्टे मासेपि कारयन्॥ ज्येष्ठापंचकमाचार्यैः स्त्यजे ज्येष्ठचतुष्टयं ज्ये
ष्टेत्रयं निषिद्धं स्यात् ज्येष्टे ह्यनुमध्यमं॥ ज्योतिर्निबंधे॥ कंन्यावरो यदि स्यातां माद्यगर्भसमुद्भवौ॥ न
योरेवभवेज्येष्टानक्षत्रं चैव वा यदि॥ ज्येष्ठमासो भवेद्वापि ज्येष्ठापंचकमित्यथ॥ कुर्याद्युस्तनरो
मोहादायुर्मृत्युभवेनयोः॥ ज्येष्ठाचतुष्टये चैव ज्येष्ठात्रयमथापि वा॥ निषिद्धं स्याद थश्चैव वह्नितो
यं शुभदं भवेत्॥ अथ वरगुणानाह॥ ज्योतिःसारे॥ कुलं शीलं वपुर्विद्या वयो वित्तं सनाथता॥
गुणाः सप्त वरे यस्मिन्तस्मै कंन्याप्रदीयतां॥ अधोमुकः त्रियाहिनो त्यपस्मारी नपुंसकः॥ दुस्स्थ
पतिनः कुष्टो दीर्घरोगो चरोन सन्॥ मुको धा वधिरस्त्वधः पंगुकुब्जो नपुंसकः॥ कुष्टरोगो त्यपस्मा
रो देशा दोषाः प्रकीर्त्तिताः॥ रूपं शीलं कुलं कांतो वयो वित्तं सनाथता॥ यस्यां सप्तगुणा वा द्व
गुण्या तां च बुधिमान्॥ ॥इतिनारायणभट्टविरचितायां धर्मप्रवृत्तौ गर्भाधानादि पंचदशप्रक

रणं॥अथसप्तपंचमयोःसापिंड्यंवर्ण्यते॥पिंडेनसहवर्त्तंतइतिसपिंडाःसपिंडस्येदंसापिंड्यंतद्द्विधं
सगोत्रंचान्यगोत्रंचतत्रसगोत्रेमनुराह॥लेपभाजश्चतुर्थाद्याःपित्राद्याःपिंडभागिनः॥पिंडदःस
प्तमःतेषांसापिंड्यंसाप्तपौरुषंइति॥नन्वमनुरुक्तं॥इतिविषयएवेतिहेयं॥नान्यत्रेति॥इति व्युति
रत्नेऽपिसापिंड्यंसाप्तपौरुषंइति॥भाष्यकारः॥संतानंविद्यतेयस्मात्कन्यायाश्चसुतस्यच॥
तत्रवेत्सप्तमादर्वाक्अन्यगोत्रात्तुजायते॥संततिःपुरुषस्यापिस्त्रियाअपिचवायदि॥सापिंड
यंतद्द्विजानीयाद्दूरवध्वोर्विवाहिके॥पितृतःसप्तमादर्वाक्मातृतः॥पंचमादयः॥सपिंडतानु
भावेननोद्वाहैचैववरकन्ययोः॥आचार्यः॥संतानंभिद्यतेयस्मात्पूर्वजोदुभयत्रवः॥तन्मर्यादंग
णेचोभान्वरोण्यावत्कन्यकां॥असपिंडाचवरयेत्पितृतः॥सप्तमात्परं॥मातृतःपंचमादुध
मसमानार्षगोत्रजां॥प्राहवत्क्रमः॥मूलगोत्रादन्यगोत्रामुद्वहेदष्टमोष्टमो॥अन्यगोत्रादन्यगो

त्रां षष्ठषष्ठों समुद्वहेत्॥ पंचमात्सप्तमात्पूर्वं कन्यामुद्वहते यदि॥ स्वसारं मातरं चापि द्विजः स्याद्गुरुतल्पगः॥ आचार्याः साापिंड्यं मुनिभिः प्रोक्तं मातृतः पितृतः क्रमात्॥ न साापिंड्यं विजानीयान्नर्मदोत्तरवासिनः॥ सापिंड्यं प्राहुराचार्याः संकोच्यापि सपिंडनं॥ ज्ञात्वा व्यंतव्व धर्मेहे नर्मदायाश्च दक्षिणे॥ पंचमो सप्तमो चैव मातृतः पितृतस्तथा त्रोणि चाति सप्तमात्ऋः पंचानोत्य चवै पितुः॥ संग्रहे॥ चतुर्थिमुद्वहेत्कन्यां चतुर्थः पंचमीमपि॥ पाराशरमतात्सष्ठी पंचमोऽत्र तु पंचमो॥ श्लोकरंगएषा नामार्षजो पक्षो पंचमः पंचमो यदि॥ विवाहो नैव कर्तव्यो न्यूनस्त्वकशुभावहः॥ तृतीयो वा चतुर्थो वा पक्षयोरुभयोरपि॥ विवाहेत्तां मनुः प्राह पाराशर्यो यमो गौतमः॥ शाकलेः॥ भवेतान्युवेजान्युत्रोत योरपि च संततिः पंचमः पंचमौ कन्यां न तत्र वरयेद्द्विजः॥ कन्येद्वे पूर्वज्यात्स्यानांसंततिस्यो भयोरपि॥ पंचमः पंचमो तत्र वरः कन्यां समुद्वहेत्॥ कन्यापुत्रोऽधसंभूतौ पूर्वजात्संतनस्थि स्तयोः॥ यदिस्याद्व

रयोतत्रपंचमःपंचमोयदि॥आचार्यैःकंन्यावरस्यसापिंड्येमातृसंज्ञोभवेद्यदि॥स्वसृसंज्ञाथवापुत्री
नैवंतावरमेद्बुधः॥हेमाद्रौ॥चतुर्थीपंचमोवापिषष्ठोवामातृसंज्ञिका॥स्वसृसंज्ञाचपुत्रीचसंज्ञातांपरि
वर्जयेत्॥यत्रोक्तःसापिंड्यनिवृत्त्यपूर्वंतत्रैववैकन्यायदिमातृसंज्ञा॥पुत्रीयदिस्याद्वरगोत्रोयदिस्यात्त
दाविवाहोनकदाचिदेवा॥पुत्रीविषयेकेचिदाहुः॥पुत्रीकामुद्वहेद्विप्रःकेचिदाहुर्वदंतिहि॥भगि
नींमातरंचैवयदिचोत्पतितोभवेत्॥आचार्यैः॥चात्रिपुत्रिंस्वसारंचनैवतांवरयेद्द्विजः॥केचिदाहुःके
चिदेशेषुत्रिकामुद्वहेतिति॥ततोयोवाचतुर्थोवाचतुर्थीवापंचमोपितन्मातृतः॥दक्षिणेतुद्वहेवंस्या
स्वसारंमातरंविना॥जननींभगिनींचैवपुत्रिसंज्ञाचकंन्यका॥नैवतांवरयेद्विप्रोगालवोमनुरब्रवीत्
व्याघ्रपादः॥उद्वहेद्दक्षिणेद्विद्वान्मातुलस्यचवैसुतां॥उत्तरेनोद्वहेद्विप्रोह्येषधर्मःसनातनः॥आचा
र्यैःमातुलस्यसुतांविप्रोदक्षिणेतांसमुद्वहेत्॥वर्जनीयाप्रयत्नेनसैववरजनेषुभिः॥स्मृतिः॥मातुल

स्वसुतां के चित्के चित्स्यैत स्वस्रासुतां॥ विवाहे तां के चिद्दे त्रो संकोच्यापि सपिंडनां॥ अथ सापिंड्ये पि के
चिद्विशेषमाहुः॥ पितृभार्यां च भगिनीं तत्सुत्रीं च परित्यजेत्॥ सापत्निभार्याभगिनीं तत्सुत्रीं च परित्यजे
त्॥ तथा च॥ पितृव्यभार्याभगिनीं च तत्सुतां॥ सापत्नमातुर्भगिनीं च तत्सुतां नैवोद्वहेत्॥ तां यदि चेत्स
मादाचं उल योगे रिवकारणं भवेत्॥ वाक्यबंधकृतानां तु स्नेहसंबंधभागिनां॥ गन तयो रुद्वहेक
न्यां सा कन्याभागिनी भवेत्॥ सावित्रो यस्य योर्दद्यात् कन्यान विवाहयेत्॥ तद्गोत्रे न त्कले वापि वि
वाहे नैव हन्त्व्यो सा कन्याभगिनी भवेत्॥ पैत्रे प्रवरभिन्नत्वं चिंतयेन्तु मातृकोः सपुत्रियास्तु तेगोत्र
प्रवराश्च न चिंतयेत्॥ अथ गोत्रनिर्णयः॥ भृग्वंगिरः कश्यपात्रिवसिष्ठागस्त्यगाधिजः सप्त ऋ
षयोस्तेभ्यो गणा अष्टादश भवेत्॥ भृग्वोः पंच गणाः पूर्वे मष्टावंगोरसो गणाः॥ अन्ये त्वेकैकगणा
ः द्वात्यष्टादश व ह गणाः॥ जामदग्न्यो वितहव्यः स्तथा गृत्समदाभिधः॥ व्याघ्रश्चैवान्यएते से भृग्वोः

72

पंचगणास्स्मृताः॥प्राग्जामदग्न्यो वत्सश्रीवत्सो वत्सइत्यपि॥ततोमांडव्यमांडुकोपोनहव्येतिशापि
नः॥वैरोहितश्चवाल्मिकः पाणोनिर्जनदग्निकः॥आर्ष्टिषेणोष्टिषेणोचरूपोविदचटा अपि॥प्राचो
नयोग्यवेदात्मा जामदग्न्यगणर्षयः॥अत्रादितोदशानांचपंचत्रोप्रवरा अमी॥भार्गवच्यवनाप्नवौ
र्वजामदग्न्याइतिपंचप्रवराः॥शुद्धजामदग्निप्रभ्रिवराः॥भार्गवच्यवनाप्नवानार्ष्टिषेणयोः पंचप्रवराः
भार्गवच्यवनाप्नवानार्ष्टिषेणेनुयाइति॥वेदादीनांपंचप्रवराः॥भार्गवच्यवनाप्नवाभौर्ववदाइति
एवंचतुर्थः॥प्रवरैर्भिन्नोप्येकौगुणोप्येयंप्रवरं सर्षिसाम्येनमिथामइवादिनः॥इतिजामदग्न्या
गणाः॥वीतहव्यंश्चयस्कश्चवाधुलिमौनमौकसौ॥शार्करामिश्चशालंकायनजैमिनीः॥जोव
सायमजाबालिसावर्णिश्चगणर्षयः॥वीतहव्यादयस्त्वन्येस्त्रुस्त्रिप्रवरका अपि॥भार्गववीतह
व्यसावेदसइति॥एतदेवंप्रवरमिथोनविवाहोतेन॥तुभौगात्स्यमदस्येतोन्नतोयोगणाइष्यतेअ

नयोःप्रवराःभार्गववात्स्मदशौनकाइति॥ एवंप्रवरसाम्येननमिथोनविवाहिनः॥ वाधस्यामित्रयुग्मो
मौचतुर्थोगणइष्यते॥ अनयोःप्रवराः॥ भार्गववदिवोदासवाध्र्यश्वइति॥ एतत्त्ववरसाम्येननमिथोन
विवाहिनः अथवैन्यश्चपार्थश्चपंचमोगणइष्यते॥ प्रवराःभार्गवोवैन्यःपार्थइत्येवंत्रयः॥ एतेप्प्ये
वप्रवरकामिथोमिनविवाहिनः॥ मिथोविवाहस्त्यापंचैतेस्युक्ताभार्गवादिमा॥ जामदग्न्यादयःपंचा
मिथोग्न्यास्त्याविनामोदं॥ अथांगोरसगणाः गौतमोथभरद्वाजकपिकण्वोथमुद्गलःविरूपोहरि
तोविष्णुः वृद्धश्चैवाष्टमोमतः॥ त्रयोस्योचथ्योशिजकक्षीवद्दीर्घतमसाः॥ वामदेवोवार्हदुक्थ्यागौ
तमस्यगणएषयः॥ आषष्टिकोत्रोप्रवरकेतितमः॥ तथाहि॥ आंगोरयास्यगौतमाइति॥ आंगो
रसगौतमोचथ्याइति॥ आंगोरसगौतमौशिजाइति॥ आंगोरसगौतमकाक्षीवताइति॥ आंगो
रसगौतमदेवतमसाइति॥ आंगोरसगौतमवार्हदुक्थ्याइति॥ आंगोरसगौतमौचथ्यौशिजबाहु

73

दुकथ्या इति प्रवरद्वैर्षिसाम्येन मिथो मोन विवाहिनः॥ अथ भरद्वाजगणः॥ भरद्वाजोपकक्ष्वग्निवेश्य
औजयोनिस्तथा॥ सर्वस्तंबस्तंबशरद्वस्तंबश्चापि कपिस्तथा शौंगशैशिरिक्षोलनक्षोव्यदन
दूत्यपि॥ तथा मोनवचागार्ग्यैः कपिःकापलद्रत्यपि॥ एते सत्यदशरव्याता भरद्वाजगणर्षयः॥
अत्रादितः कृता नानां प्रवरास्त्रिप्रकीर्तिताः॥ अंगोरसबार्हस्पत्यभरद्वाजा इति शौंगशैशिरि
क्षोलाः पंचप्रवराः॥ अंगोरसबार्हस्पत्यभारद्वाजाकात्यायना इति॥ नक्षादीनां पंच प्रवराः॥ आं
गोरसबार्हस्पत्यभारद्वाजसैन्यगार्ग्या इति॥ प्रवरणार्षसाम्येन मिथो मोन विवाहिनः॥ अथ क
पिलगणाः॥ गोतमादि वदेवा मंगलपुत्राष्टकान्विताः॥ आतो गार्ग्यकपेभर्तुस्वातंत्र्येणाविशे
षतः॥ भारद्वाजैःस्तु दुत्तोस्य विवाहो गोत्रकेस्विले॥ गणस्य संविहाया थ विवाहः शुभदो भवेत्
तथा चोक्तं स्मृत्यर्थसारे॥ कपिप्रसिद्धा विहता विश्वद्वैस्वतंत्रएको ष्यपरोस्व तंत्रैः॥ तत्र स्वतंत्र

स्वकपेर्विवाहं मिथो भरद्वाजकुलेन चाहुरिति ग्रंथान्तरेप्ययमत्यर्थः॥ प्रकारांतरेण दर्शितं क
तिविद्भरद्वाजानभिधायोक्तं॥ नान्तरः परेषां हरितानधस्तान्नप्यो विवाहस्सवपोनपास्येति॥
अविवाहोऽभ्यपयुदस्थानां कपोनां विवाहोऽस्तोस्सक्तं भवति आश्वलायनेन गत्युपरि शिष्टेतु॥ अ
स्यतेष्टका भरद्वाजेषु कपोनां विवाहसद्भावस्य ग्रापि॥ भरद्वाजकुले केषांचिद्विवाहमभिधायो
क्तं एतेषां तु विशेषोयं महाचार्याभिधानवेः॥ आरूक्षयेश्च कपिभिर्विवाहस्त्रिभिरिष्यते॥ अ
यं कपिस्त्रिप्रवरः॥ आंगोरसमारोचयोकक्षाइति अत्र कपिभिरिति बहुवचनं॥ तत्सुत्राभि प्रा
येण तेचाप्युक्ताः॥ वरस्थितिरश्वापि विदुषण्लकः पतंजलिः॥ भूयसोर्धोणिकश्चैव जलंधरेति
चाष्टधा॥ कपिपुत्रासमारव्यानास्तेषां कपिवदिष्यते॥ कपिवदिष्यतइत्यनेन एतेषां भरद्वाज
कुले विवाहसिद्धिरिस्युक्तं॥ कपिपुत्रत्वेत्वोक्ता मिथो मोनविवाहो नइत्युक्तं॥ प्रयोगपारिजा

ते॥भारद्वाजगणस्यापि यथा कपिगणस्य चा॥विवाहो न विषये स्यादन्योन्यतु कदाचनेति॥अथ कण्व
गणः॥आंगोरस्या आजमीढाः कण्वश्चापित्रयो॥मिथो विवाहं नास्तीति समानप्रवरात्वतः॥केचि
त्सवरानन्यानेवाहुः॥आंगोरसाघोतकाण्वा इति॥अथमुद्गलगणाः॥मुद्गलास्त्रिवदाचताक्ष्र्यो
भार्म्याश्वएव चा॥मुद्गलश्चेति पंचैते मुद्गलस्य गणर्षयः॥एतेषां त्रिःप्रवराएव॥आंगोरसभार्म्या
श्वामौद्गल्या इति॥प्रवरैक्येन पंचामो मिथोपि नविवाहिनः॥अथविरूपः॥विरूपः पृषदश्वश्च
पार्श्वदश्वोरथीन्तरः॥अंगुष्ठाश्वाष्टदंष्ट्रश्च विरूपस्य गणर्षयः॥एतेषां त्रिःप्रवराः॥आंगोरस
पार्श्वदश्व वैरूप्येति॥एतदेवप्रकारकं मिथो मान विहितः॥अथ हारितः॥हारिताश्चांबरी
षश्चमांधातायौवनाश्वकः॥कौत्सः पैग्यार्त्रांखदर्भौन्तोहैमगणाविदः॥कौमारवद्वष
स्वेने हारितस्यगणार्षस्या॥एतेषात्रिप्रवराः॥आंगोरसआंबरीषहारिता इति॥अंगारसआंब

राम
७६

शेषयौवनाश्वइति॥ द्विधा तुल्यैकप्रवरस्त्वेन मिथोविवाहिनः॥ अथ विष्णुवृद्धः॥ त्रारण्यप्रमशाप
णावये॥ द्रुम्नणाः॥ नोतुनिर्मेद्रूणे काम्यावरुणो सांकृत्यकारपि॥ आंगोरसयौनकुत्सत्रासदस्यव
इति॥ तुल्यैकप्रवरत्वेते मिथोमिनविवाहिनाः॥ इत्यांगोरसप्रकरणं॥ अत्र निष्णिदृमाह॥ पंचान्या॥
त्रिषुसामान्याद्विवाहस्त्रिषु द्वयोः॥ भृग्वंगोरोगणावेवत्रोषेषेकोपि वारयेत्॥ त्रोषेष्विति कश्य
पादिष्विस्यर्थः॥ अथ कश्यपः॥ काश्यपवत्सारासितो नैध्रुवस्तथा वैशंपायन भूतांश्रू सुमेधा
नैध्रुवो अमोरेभ्पारेभ्पः शांडिल्यश्वसौ जामो भागुरिस्तथा॥ धन्वंतरि च शांडिश्चदेवलः का
श्यपा अमो॥ काश्यपानां त्रिःप्रवराः॥ सितनाइति निध्रुवादीनां त्रिःप्रवराः॥ कश्यपअवत्सा
र नैध्रुवा इति॥ रेभादीनां त्रिःप्रवराः कश्यपावत्सार रैभया इति॥ प्रवरद्वयर्षिसामान्ये
न मिथो न विवाहिनः॥ अथात्रिगणाः॥ आद्योस्ति प्रथमस्त्यास्ति कृष्णचंद्र पराद्रिरा॥ आत्रे

यावामद्रथ्याग्न्यागणे विष्ठिरसावाह्यः॥पौर्वातिथ्योतिश्चापिवद्वैतकधनंजयौ॥सुमंगलोवाज
वापिसोमंगल्योत्रिवंशजः॥अत्र्यादिवामरथ्यानांत्रिःप्रवराः॥आत्रेयार्चनानस्यावाश्वेति॥
अत्रिवभूतकगणयोःप्रवरैकोपिमिन्नस्यास्वाध्यायनाद्वैदरस्कत्वं॥सुमंगलानांत्रिःप्रवराः॥आ
त्रेयसुमंगलश्यावाश्वेति॥आद्यद्वयत्रार्षेपि प्रवरैदेनमिथोनविवाहिनः॥अथवसिष्ठगणाः॥आ
द्योवसिष्ठउपमन्युस्ततःपरं आभरद्वसुरथौद्रप्रमदश्चपराशरः॥पाराव्यासशान्तिकुंडोनेगणे
द्वस्यपि॥सांख्यायनोजातूकर्ण्यःकौडिन्यश्चततःपरं॥मैत्रावरुणरिक्ततेवसिष्ठस्यगणर्षयः॥
आद्यस्यप्रवरैकस्यात्तत्रास्युःप्रवरास्त्रयः॥तत्रवसिष्ठानामेकप्रवरः॥वसिष्ठादीनांत्रिःप्रवराः
वसिष्ठाशक्तिपराशर्येति॥कुंडिदीनांत्रिप्रवराःवासिष्ठमैत्रावरुणौकौंडिन्येतिप्रवरद्वय
पिसामान्येनमिथोमोनविवाहिनः॥अथागस्त्यगणाः॥अगस्तिचनथागस्त्योदर्भच्युतइतित्रयः

इध्मवाहः सोमवाहः सारवाहस्त्रयोऽप्यमी प्रवरां नविकल्प्येन मिथो मोनविवाहिनः॥ अत्र केचि

दाक्षिपंति॥ एवं स्तंभांसमुत्क्रस्य एकनाम च संभवैः॥ मैत्रावरुण्योरनयोर्गणभेदः कथं भवे

दिति॥ अत्रोच्यते॥ द्वयोरेव द्यटोत्पत्तिर्नैकजातस्य साधनं॥ समानसमयोत्कृत्स्येनामैक्यमविचारि

तः॥ मित्रावरुणयोरस्यैकभेदादेकं कथं भवेत्॥ प्रसूमेक्यमविचारितः॥ मित्रावरुणयोस्त्वेक

भेदादेकं कथं भवेत्॥ प्रसूतिग्रहवत्वाणमुष्योनकारणं॥ पत्नित्वाभागभेदे च न तयोरेतसो

र्द्वयोः॥ पृथगेषसमुत्क्रस्य देविनावोतिसमंजसं॥ अथ विश्वामित्रगणः॥ विश्वामित्रो देवरा

तश्चैको लोगालवोमनुः॥ तनौलिकी वालखिल्योयातवल्कश्च कौशिकः॥ उलको वृहद्दग्नि

श्च धूम्रः शालंखावनिस्तथा॥ शालंकायनतिः शालाग्निस्तथा शालवनोदरैः॥ श्रौतमो देव

तरसः कामकायसंतिहिकौ॥ देवश्रवाश्चाथ धनंजयधनंजयाचुभौ॥ मधुछंदाः प्रजायसोत्र

जाह्नवोज्योरिणाह्नकालोहितःपुरणःपारिश्रवायश्चतुषेरणौ॥ कतरोक्षाककाराश्चत्यक्षापाला
घमर्षणः॥ रेणुःपनसधुमंचवावभ्रोजठरस्तथा॥ एहव्याग्निश्चवैश्यश्चशालंकायनसंज्ञकः
शालाक्षोलोहिताक्षश्चजह्नुश्चापिकौशिकः॥ घनकौशिकइत्येतेविश्वामित्रोगणर्षयः॥
प्रवरास्त्र्यएकोकाविश्वामित्रगणस्यतु॥ विश्वामित्रोदेवरातानांत्रिःप्रवराः॥ विश्वामित्रो
देवरातौदेवलइति॥ श्रामैनादितिचतुर्णांत्रिःप्रवराः विश्वामित्रोदवरातौदेवश्रवाइति॥ ध
नंजयादिचतुर्वर्णांत्रिःप्रवराः॥ विश्वामित्रमधुछंदसधनंजयाइति॥ अतोन्ययोस्त्रिप्रवाराः
विश्वामित्रामधुछंदसांडयइति॥ कृश्रादिचतुर्वर्णांत्रिप्रवराः विश्वामित्रकात्यायेनकोलाइ
ति॥ इतिविश्वामित्राप्रकरणं॥ एकएककरुषिपांवस्वरेषनुवर्त्तते॥ तावत्समानगोत्रत
रतेभृगवंगोरोगणानां॥ एवमुक्तेषुनेदेषुगणेषष्वादशस्वपि॥ सामान्येनोद्वहेप्रास्तेविशेषो

त्वनिरूप्यते॥ अन्ये स्वस्वगणं हित्वा विवाहे युग्गणांतरे॥ गणांतरेपि तुल्यार्षत्वान्नोद्वाहेषुः पर

स्परं॥ प्रदर्शयामस्तु तुल्यार्षत्वान्न गणभेदव्यवस्थितान्॥ स्वतंत्रं भृग्वा स्वतंत्राश्च द्वौ क्रमो गण

भेदतः॥ कुवाक्षो द्वौ भरद्वाजौ विश्वामित्रगणद्वये॥ सांकृतो पूतिमाषाश्च शंबुत्रौ वंगणस्त

था॥ त्रोंडिवैयाघ्रपादश्च भरद्वाजकुलेमद्भवः॥ कश्यपस्तो नाव वसिष्ठेन गोद्वात्वसत्कृगणद्वये

कश्यपेन वसिष्ठेन कौ नाम गोत्तमवंशजाः॥ आनष्टिरः कुष्टिरातिराजबारिस्तथैव च॥ सैर

जःक्षोरभोवाहः सैरंध्रो राजसेवकाः॥ स्वशुचिः स्यापुलिंग्यश्च लौगाक्षो शारदंबकौ॥ त्रे

योदशैते मुनयः समस्ता न्यान्मुनिकृतांशः। त्रो मम नवान्हि ति तथैव तत्व्यवस्थितांशः॥ अ

तो गणत्रये प्येतेन विवाह्याः कपंचनएव नोल्लितमुद्वाहं परित्यज्य प्रमाघद्विं॥ तथा च स्म

संतरे॥ जामदग्निगणस्यापि विश्वामित्रगणस्य च॥ नदेवरातगोत्रेण विवाहे स्यात्सर

स्परं॥भरद्वाजगणस्यापि विश्वामित्रगणस्य च॥कत्तरौक्षिरश्यं गौश्च नान्येषां पाणिपीडणे ॥
काश्यपस्य गणस्यापि वसिष्ठस्य गणस्य च॥संकृतिपूतिमाषाभ्यां विवाहे न परस्परं॥अ
त्रेयस्य गणस्यापि विश्वामित्रगणस्य च॥धनंजयास्य गोत्रेण विवाहो न परस्परं॥भरद्वा
जगणस्यापि तथा कपिगणस्य च॥विवाहो विधयस्यादिस्यवं मुनयो ब्रुवो तमो हत्स्यगण
स्यापि विरूपस्य गणस्य च॥परस्परं न कुर्वित पाणिपीडणसत्क्रियां॥द्व्यामुष्यायकाः सर्वे
दत्तविक्रितकादयः॥मातृद्वयेपि नोद्वाहे शिरयोर्यथा॥आचार्यः॥द्व्यामुष्यायणैकस्ये वनो
द्वाहो गोत्रयोर्द्वयोः॥सगोत्रो त्वनभिज्ञैश्च विप्रैराचार्यगोत्रजा॥याः संप्रज्ञातबंधुनां आचा
र्यप्रवरसमताः॥पक्षेप्यामिन्विवाहे च सगोत्रैः सह नेष्यते॥अज्ञानादथवा ज्ञानाद्यस्तु
वै यदि चोद्वहेत्॥समानप्रवरां कन्यां मातृवत्परिपालयेत्॥समानप्रवरां कन्यां सपिंडं

चैकगोत्रजाः॥ नैव तां वरयेत्प्राज्ञो मातृवत्परिपालयेत्॥ इति नारायणभटविरचितायां ध
र्मप्रवृत्तौ गोत्रप्रवरनिर्णयः॥ अथ जीवत्पितृकश्राद्धविधिः॥ आमश्राद्धं गयाश्राद्धं श्राद्धं चा
परपक्षिकं॥ न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणं॥ न जीवत्पितृकः कुर्यान्मुंडनं तीर्थि
कं च यत्॥ महालयं गयाश्राद्धं श्राद्धं च पितृतर्पणं॥ अब्दादिकं यदान्यत्क न्नेमशक्तः श्चेमाता
पदि॥ तदा पुत्रेण कर्त्तव्यमवश्यं पितरि नृप॥ पारस्करः॥ विघमो नेच पितरि श्राद्धं कर्तुमुपा
स्थेनं॥ पितृव्यादेरपुत्रस्य कुर्याच्छ्राद्धमसंशयं॥ वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति॥ एभ्य एव
पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः॥ उद्वाहे पुत्रजनने पित्र्येष्टौ सोमके मुखे॥ तीर्थे ब्राह्मण आयाते ष
